अध्यापकमित्रम्

केरलपाठावलिः

# संस्कृतम्

द्वितीया कक्ष्या

अक्कादमिक-संस्कृतविद्यालयानां कृते।

**TEACHER TEXT**

**KERALA SANSKRIT READER**

**Standard II**

For Academic & Sanskrit Schools

**Government of Kerala**
**Department of Education**
**2015**

## TEXT BOOK DEVELOPMENT COMMITTEE

## STANDARD II

### PARTICIPANTS

1. **Pradeep Kumar .K,** G.H.S.S Belluru, Ksargod
2. **Shiju.M.T,** G.B.U.P.SPerdala, Kasargod
3. **C.B.Vinayak,** G.V.H.S.S Vayala, Kottayam
4. **Deepesh.K.R,** G.H.S.S Vellathooval, Idukki
5. **S.Unnikrishnan Nair,** BRC Trainer (Rtd), Charippurathuplavila veedu, Edakkidom.P.O, Kollam.
6. **Madhu.K,** AUPS Kodlamogru , Kasargod
7. **Prasanthan puthiyandi,** GUPS Katamberi, Kannur

### EXPERTS

1. **V.Vijayan**, Senior Lecturer (Rtd.)
   Krishna Kripa, Maruthur, Pattambi, Palakkad.
2. **Dr.K.Mohandas,** Lecturer (Rtd.), DIET, Ernakulam
3. **Dr.T.D Suneethy Devi**, Special Officer (Sanskrit) DPI, Kerala

### ADVISOR

1. **Prof. Dr. R. Vasudevan Potti**, Professor (Rtd),
   Govt. Sanskrit College,Thiruvananthapuram

### Academic Co-ordinator

**Dr.Shameeja.P**, Research Officer (Sanskrit) SCERT


*Prepared by*

**State Council of Education and Training (SCERT)**

Vidya Bhavan, Poojappura, Thiruvananthapuram 605012

website www.scertkerala.gov.in

email scertkerala@asianetindia.com

Department of Education. Government of Kerala 2015

# भूमिका

छात्रकेन्द्रीकृता प्रवर्तनाधिष्ठिता नूतनाशयैः सन्निविष्टा च पाठ्यपद्धतिः केरलेषु प्रचलति। शिशोः समग्रं विकासं लक्ष्यीकृत्यैव एषामाशयानां प्रवृत्तिः। शिशुमनःशास्त्रम् अनुसृत्यैव परिष्कृता पाठ्यपद्धतिः।

प्रथमं पाठभागः ततः पठनप्रवर्तनानि अनुबन्धश्च इति क्रमः प्रत्येकस्मिन्नेकके स्वीकृतः। पाठ्यांशस्यावतारणाय उचितसन्दर्भानायोजयितुम् अध्यापकाः सोत्सुकाः भवन्तु। तदर्थम् अध्यापकमित्रमिदम् उपकारकं भविष्यति। पाठपुस्तके निर्दिष्टानां सर्वेषामपि पठनप्रवर्तनानां प्रचालनक्रमाः उत्पन्नरूपेण परिकल्पनीयाः अंशाः निरन्तरमूल्यनिर्णयविधयश्च अध्यापकमित्रेऽस्मिन् निर्दिष्टाः। अधिकपठनप्रवर्तनान्यपि यथोचितं कक्ष्यायां दातुम् अध्यापकस्य स्वातन्त्र्यमस्ति।

लिखितानां व्यवहाररूपाणां सूचनानुसारं परिष्करणेन छात्राः भाषाप्रयोगे समर्थाः भवेयुः। निरन्तरमूल्यनिर्णयं सफलं कर्तुम् अध्यापकः यतताम्। तदर्थम् अध्यापकमित्रमिदं सहायकं भवेत्। अपि च संस्कृतपठनं सर्वथा मधुरं सफलं च भवतु इति आशासे।

भवदीयः

**डॉ. एस् . रवीन्द्रन् नायर्**

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद

# विषयानुक्रमणिका

| विषयः | पुटसंख्या |
|---|---|


1. सामान्योपगमः। ........................................................ 5
2. संस्कृतभाषोपगमः। ...................................................... 16
3. मूल्यनिर्णयोपगमः। ...................................................... 18
4. सञ्चितपुटानां मूल्यनिर्धारणम्। ........................................ 22
5. अध्यापकमित्रं नाम किम्? किमर्थम्? ................................. 28
6. वार्षिकासूत्रणम्। ........................................................ 29
7. प्रथमः पाठः हे चित्रपतगाः। ............................................ 30
8. द्वितीयः पाठः कुक्कुटशाबकः। ......................................... 35
9. तृतीयः पाठः तव इष्टं किम्? ........................................... 43
10. चतुर्थः पाठः विद्यालयः। ............................................... 48
11. पञ्चमः पाठः काकः शरारिः च। ........................................ 52
12. षष्ठः पाठः संख्याक्रीडा। ................................................. 58
13. सप्तमः पाठः जननी जन्मभूमिश्च। ..................................... 63
14. अष्टमः पाठः सुभाषितानि। ............................................... 70
15. नवमः पाठः क्रीडाम तुष्याम। ........................................... 77
16. दशमः पाठः रामदासस्य कौशलम्। ...................................... 82
17. एकादशः पाठः भगवद्गीता। ............................................. 88
18. प्रश्नपञ्चिका-उत्तराणि। ................................................... 94
19. दैनिकासूत्रणम्। ........................................................ 100

# सामान्योपगमः

## केरलविद्यालयपाठ्यपद्धतिः २०१५

जनसमुदायस्य जीवितगुणोत्कर्षेण केरलराज्यं सर्वस्य भारतदेशस्य आदर्शभूतं वर्तते। जनशिक्षायाः सार्वत्रिकख्यातिः तथा जनारोग्यरक्षणे उपलभ्यमाना सार्वत्रिकी पुरोगतिश्च प्राधान्येन केरलस्य प्रथमस्तरोपलब्धेः कारणम्।

सामान्यशिक्षाविभागस्य प्रादेशिकसर्वकारसंस्थानां चाधीने विद्यमानानां समग्रविद्याभ्यासपद्धतीनाम्, प्रबुद्धानां जनानां निरन्तरप्रवर्तनानां फलरूपेण च सार्वजनीनविद्यालयेषु नितरां गुणप्रकर्षः समजनि। एवम् आदर्शभूतस्य केरलदेशस्य शिक्षामण्डलस्य एतादृशगुणम् इतोऽप्यधिकतया वर्धयितुम् उत्कृष्टानां समर्थानां छात्राणां सृष्टिरावश्यकी। उत्कृष्टशिक्षायाः छात्राणामधिकाररूपेणाङ्गीकारे पाठ्यपद्धतेरपि गुणः दृढीकरणीयः प्रवर्धनीयश्च।

लोकपरिवृत्त्यनुसारं आधारिकविद्याभ्यासपरिचायन- पाठनरूपेण वर्तमाना प्रक्रिया अपि उचितरूपेण परिवर्तनीया। विद्याभ्यासप्रक्रियायां सर्वदा वर्तमानानां, विविधमण्डलेषु विद्यमानानां चिन्तासरणीनां दर्शनानां चाधारेणैव अधुना पाठ्यपद्धतेः परिष्कारः प्रचाल्यते। साधुतातः अधिकसाधुतायाः इति अन्वेषात्मकः शास्त्रीयोपगमः एव अस्यावलम्बः।

देशीयपाठ्यपद्धतिमार्गरेखायां (२००५) सप्तविंशतितमे पुटे विद्याभ्यासस्य परमप्रधानानि लक्ष्याणि अधिकृत्य सूचितविषयाः प्रसक्ताः।

१ ज्ञानं विद्यालयाद्बहिः विद्यमानेन जीवितेन सह सम्बद्धं भवेत्।
२ पठनं केवलं कण्ठस्थीकरणं न भवतीति दृढीकरणाय।
३ पाठपुस्तककेन्द्रीकृतोपगमात् व्यतिरिक्ततया छात्राणां सर्वतोमुखविकासस्य सहायकरूपेण पाठ्यपद्धतौ शेषयः निर्वचनीयाः।
४ मूल्यनिर्णयोपाधयः सरलाः पठनप्रवर्तनैः उद्ग्रथिताश्च भवेयुः।

५ राज्यस्य प्रजातन्त्रराष्ट्रिये पारस्पर्ये तात्पर्यं वैजात्यातीतं स्वत्वं च पोषणीयम्।

उन्नतचिन्तया मूल्यबोधेन च युक्ता जनता यस्य कस्यापि राष्ट्रस्य अमूल्या सम्पदेव। एतदर्थम् आवश्यकानि उदात्तचिन्तया औचित्यबोधेन च युक्तानि विद्याभ्यासप्रवर्तनानि एव विद्यालयेषु प्रचालनीयानि। राज्यपुरोगतेः गतिविगतीनां निर्णये विद्याभ्यास एव समर्थः इत्यतः क्षेत्रस्यास्य गौरवप्रवर्तनेषु अध्यापकसमाजाः भागभाजः भवेयुः इति चिन्ता अस्मासु अवश्यं भवेत्।

**१.२. पाठ्यपद्धतिपरिष्कारस्य प्रसक्तिः।**

अतीते पञ्चवर्षाभ्यन्तरे विद्याभ्यासमण्डले आगोलव्यापकतया नूतनाशयाः अवतारिताः, केचन नियमाश्च निर्मिताः। एतद्विना वर्तमानपाठ्यपद्धतेः परिमितयः न्यूनताश्च अक्कादमिकाः चर्चाभिः पठनैः च प्रत्यभिज्ञातवन्तश्च। चर्चाः पठनं च क्रोडीकृत्य परिमितीः परिहृत्य पुरोगमनं कालस्यास्यावश्यकं भवतीत्येतदेव परिष्करणममुं प्रसक्तं करोति।

निश्शुल्कं निर्बन्धं च विद्याभ्यासं लब्धुं विद्यार्थिनाम् अधिकारनियमः प्रवृत्तिपथमागतः इत्येतदेवात्र प्रधानतया सूचनीयम्। अनेन नियमेन विवक्षितेषु कार्येषु केरलराज्यं पुरोगामि भवति। उत्कृष्टः विद्याभ्यासः सर्वेभ्यो दातुमेव अस्माभिः श्रद्धा देया। एतादृशरीत्या समग्रविद्यालयविकसनपरिप्रेक्ष्यम् इति लक्ष्यं सार्थकं कर्तुम् अस्माकं पाठ्यपद्धतिः अन्तर्देशीयमानं प्रापणीया भवति। अन्तर्देशीयस्तरं कस्यापि एकस्य राज्यस्य न, प्रत्येकं स्तरं प्राप्तः छात्रः लोके यत्र कुत्रापि भवतु, तेनार्जनीयानां ज्ञानानाम् अनुभवानां च समाहृतरूपमेव भवेत् विद्याभ्यासः। अतः आगोलतले अवतारितानां, समुद्भूतानां नूतनानां प्रकृष्टानां च पठनबोधनानाम् आदर्शरूपाणि केरलराज्यस्य छात्रैरपि प्रापणीयानि। विद्याभ्यासाधिकारनियमस्थाः केचन भागाः अधो दत्ताः। ते पाठ्यपद्धतिपरिष्करणाय आधाररूपेण परिगणनीयाः।

**विद्याभ्यासाधिकारनियमः २००९**

विभागः २९ (अध्यायः - ५)

(पाठ्यपद्धतिः मूल्यनिर्णयप्रचालनक्रमश्च।)

१. प्राथमिकविद्याभ्यासपाठ्यपद्धतिः मूल्यनिर्णयप्रचालनक्रमश्च सर्वकारीयेण विज्ञापनद्वारा निर्दिष्टेनाक्कादमिकाधिकारस्थानेन प्रतिपादनीयः।

२. अक्कादमिकाधिकारस्थानस्य प्रथमोपविभागप्रकारेण पाठ्यपद्धतेः मूल्यनिर्णयप्रचालनक्रमस्य

च प्रतिपादने अधोदत्तकार्याणि परिगणनीयानि।

यथा -

१. संविधाने प्रतिष्ठितैः मूल्यैः सहानुगुणता।

२. छात्रस्य सर्वतोमुखविकासः।

३. छात्रे ज्ञानस्य नैपुणीनां च क्रमेणाभिवर्धनम्।

४. शारीरिकीणां मानसिकीनां च शेषीणां सम्पूर्णविकासः।

५. छात्रसौहृदपरे छात्रकेन्द्रीकृते प्रवर्तने च समीक्षणेन पर्यवेक्षणमुखेन च पठनम्।

६. बोधनमाध्यमरूपेण मातृभाषा प्रयोक्तव्या।

७. भीतिः, मानसिकसम्मर्दसमुत्पादकसाहचर्यम् उत्कण्ठा इत्यादिभ्यः मोचनम्, तथा स्वतन्त्रतया अभिप्रायप्रस्तावे साहाय्यदानं तथा समग्रः निरन्तरश्च मूल्यनिर्णयः।

शिक्षाधिकारनियमस्य प्रयोगावसरे निरन्तरः समग्रः च मूल्यनिर्णयः संविधानबाध्यतारूपेण संजातः। एतद्दृढीकर्तुं साहाय्यकरूपेण पाठ्यपद्धतेः परिष्कारः अत्यावश्यकः। ईदृशायामवस्थायाम् एव पाठ्यपद्धतिपरिष्कारः अस्माभिः पर्यालोचनीयः।

**केरल विद्यालयपाठ्यपद्धतेः (२००९) विशेषताः काः इति पश्यामः**

१. पठितृकेन्द्रीकृता, प्रक्रियाबद्धा, प्रवर्तनोन्मुखा. मूल्याधिष्ठिता च पाठ्यपद्धतिः।

२. बौद्धिकतले, प्रक्रियातले, मनोभावतले, मूल्यानां तले च पठितृभिः प्रापणीयेषु अधिगमेषु श्रद्धां यच्छति।

३. ज्ञाननिर्मितिः इति तत्वमाधारीकृत्य रचिता पाठ्यपद्धतिः।

४. विनिमयप्रक्रियायां वैविध्यपूर्णानां युक्तानां च पठनतन्त्राणां स्वीकाराय उपयोगाय च अध्यापकानां स्वातन्त्र्यं कल्पयति।

५. पाठनाधिगमः, विषयस्वभावः पठितृणां विभिन्नस्तरः इत्यादीन् प्रत्यभिज्ञाय पठनबोधनरीतीनामाविष्कारे आयम्यता।

६. अधिगमपठनम् आशयसम्पादनरीतिः आगमनचिन्तारीतिः चिन्तनं, नैपुणीपोषणं, सहकारितापठनं, सहवर्तित्वपठनं, प्रतिफलनचिन्तापोषणं, व्यक्तिशः संघशश्च अवसरदानम् इत्यादिकं परिगण्यन्ते।

७. निश्शुल्का सार्वत्रिकी च शिक्षा सर्वेषां छात्राणां पठनाधिगमं निश्चिनोति। प्राक्-प्राथमिकस्तरात् उच्चतरविद्यालयस्तरं यावत् समग्रतया कल्पयित्वा कृता पाठ्यपद्धतिः।

८. एकैकस्यामपि कक्ष्यायां विविधविषयाणाम् उद्दानानि (content) देशीयविषयैः सह एकीकृत्य केरलस्य पाठ्यपुस्तकानि सज्जीकरोति।

९. देशीयस्तरवत् प्रथमद्वितीयकक्ष्ययोः परिस्थितिपठनस्य उद्गथनं कृत्वा मातृभाषा, गणितं, आंगलेयभाषा इति पाठपुस्तकानि सज्जीकरोति।

१०. प्रथमतः चतुर्थपर्यन्तं कक्ष्यासु आङ्गलेयमाध्यमपुस्तकानि सज्जीकरोति।

११. श्रेष्ठभाषा, मातृभाषा चेति रीत्या च मलयालभाषापठनस्य प्राधान्यम्।

१२. प्राक्-प्राथमिकस्तरात् उच्चतरशिक्षास्तरं यावत् एकीकृतां पाठ्यपद्धतिं रूपीकृत्य औपचारिकविद्याभ्यासस्य भागं कर्तुं निर्दिशति।

१३. विज्ञानविनिमयसांकेतिकविद्या प्रत्येकं पाठ्यविषयत्वात् उपरि पाठ्यविषयाणां विनिमयं फलप्रदं कर्तुम् उपाधिरूपेण उपयोक्तव्या।

१४. विशिष्टश्रद्धार्हाणां छात्राणां कृते व्यत्यस्तं, विविधं, नूतनं च पठनतन्त्रमाविष्कृत्य प्रचालयेत्। एवमेव विविधानि मूल्यनिर्णयप्रवर्तनान्यपि रूपीकृत्य प्रचालयति।

१५. पठनाधिगमेष्वधिष्ठितस्य समग्रस्य निरन्तरस्य च मूल्यनिर्णयस्य दृढीकरणम्।

१६. आरोग्यकायिकशिक्षा, कलापठनं, प्रवृत्तिपठनम् इत्येतानि निर्बन्धपाठ्यविषयत्वेन परिगणयति।

१७. उच्चतरविद्याभ्यासतले कालानुसृतानि पाठपुस्तकानि सज्जीकरोति।

१८. राष्ट्रियशिक्षानियमस्याधारेण अधिकाराधिष्ठितशिक्षायै प्रामुख्यं ददाति।

१९. अध्यापकानां रक्षाकर्तृरूपेण छात्रस्य सुरक्षायै आश्रयरूपेण च वर्तितुम् अवसरः कल्प्यते।

२०. अध्यापकैः पालनीयायै धार्मिकसंहितायै प्राधान्यं (Code of professional Ethies for school teachers) देयम्।

२१. एकविंशतिशतकस्य पठननैपुणीः आर्जयितुम् उचितया रीत्या कालानुसृतः परिष्कारः। (21st century learning skills)

२२. मानुषिकमूल्ययुक्तानां परम्पराणां सृष्टये पर्याप्तम्।

२३. अवसरतुल्यतां समत्वं च लब्धुमुचिता विद्याभ्यासानुसृता पद्धतिः।

४. पठनं स्वाभाविकरीत्या पठितॄणां बौद्धिकं, मानसिकं, प्रवर्तनपरं च समग्रविकासं लक्ष्यीकृत्य मस्तिष्क- हृदय- हस्त समन्विता पाठ्यपद्धतिः (Curriculum for the harmony of Head Heart and Hand) इति दर्शनयुक्ता पाठ्यपद्धतिरेव विवक्षते।

एवं चेत् पाठ्यपद्धत्युपगमः कीदृशः? तस्य सैद्धान्तिकः प्रायोगिकाधारः कः भवेत्।

**१.३. पाठ्यपद्धत्युपगमः।**

ज्ञानेन्द्रियाणामुपयोगेन परिस्थितेः पठने नैसर्गिकशेषिभिः सह शिशुः जायते। विश्वं नूतनरीत्या विलोक्य अवगत्य, निर्णयं कर्तुं सामर्थ्यम् एव विद्यालयात् लब्धेन औपचारिकपठनेन प्रापणीया।

स्वस्य पुरतः विद्यमानेषु प्रश्नसन्दर्भेषु भागं स्वीकृत्य प्रश्नपरिहरणप्रक्रियया एव पठनं प्रचलति। पाठ्यपद्धतिविनिमयोपगमस्य विशेषताः काः भवेयुः?

- प्रवर्तनाधिष्ठितः।
- प्रक्रियाबन्धितः।
- पठनदृढीकृतः।
- पठनाधिगमानां फलप्राप्तये पर्याप्तः।
- परिस्थितौ अधिष्ठिता।
- विकासक्षेत्राणां परिगणनात्मकः।
- पठितुः प्रकृतेरनुगुणः।
- पठनेन सहैव मूल्यनिर्णयोऽपि समन्वितः।

ज्ञाननिर्मितिवादे अधिष्ठिता पठनरीतिः पाठ्यपद्धतेः आधारः। पठितॄणामार्जितज्ञानस्य आशयस्य च परिगणनया फलप्रदानां पठनप्रवर्तनानां सज्जीकरणेन स्वाभाविकज्ञाननिर्माणं कर्तुं शक्यते इत्येतदेवास्य दर्शनस्य वैशिष्ट्यम्।

**पठनानुभावाः।**

विभिन्नजीवनसाहचर्येभ्यः आगच्छतां पठितॄणाम् आर्जितज्ञानं, शेषी तात्पर्यम् इत्यादीनि

विभिन्नानि एव। एतद्वैविध्यं परिगण्य व्यक्तिवैजात्यं तथा बहुमुखबुद्धिं च परिगण्य पठनानुभवानां सज्जीकरणमित्येतदेव प्रधानम्।

**पठनान्तरिक्षम्।**

पठितुः तात्पर्यं विकासं च परिगण्य विविधपठनप्रवर्तनेषु भागं ग्रहीतुं युक्तरीत्या कक्ष्या सज्जीकरणीया। छात्रकेन्द्रीकृतपठनप्रवर्तनानां साहाय्यकरीत्या प्रवर्तनाधिष्ठितपठनं कथं सज्जीकरणीयमिति अस्माभिः प्रत्यभिज्ञातं किल?

**पठनप्रक्रिया।**

- एकैकोऽपि पठिता स्वपूर्वानुभवानां संबन्धेनैन ज्ञाननिर्मितिं करोति। (knowledge construction)
- ज्ञाननिर्माणं, व्यक्तितले समाजतले च अन्तर्भावितम्।
- विविधाः पठनशेषीः (Learning skills) परिगण्य विविधैः इन्द्रियानुभवैः पठनं फलप्रदं भवति।
- सहकरणात्मके संवादात्मके चान्तरिक्षे पठनम् अन्यन्तं फलप्रदं भवति।
- पठनवेगतां परिगण्य पठनानुभवानां दानेन पठनं फलप्रदं भवति।
- पाठ्यवस्तु तात्पर्योत्पादकम् अर्थपूर्णं च भवेत्। तर्हि पठनं फलप्रदं भवति।
- पठनानुभवाः चाक्रिकरीत्या (Spiralling) अवतारयति चेत् पठनं फलप्रदं भवति।
- पठनप्रवर्तनानुगुणम् आयम्यता (Flexibility) अनुरूपीकरणं (Adaptations) पठनप्रवर्तनानां चयनं (selection) इत्यादीनां प्रचालनेन विभिन्नपठनस्य आवश्यकयुक्तान् अभिरुचियुक्तान् च परिगणयेत्।
- पर्याप्तपठनानुभवानां लाभेनैव पठनाधिगमः दृढीकर्तुं शक्यते।
- पठनं, मूल्यनिर्णयश्च उद्ग्रथितरूपेण चालनीये।
- विषयाधिष्ठितानि उद्दानानि (Contents) पठितुः पठनावश्यकताः च परिगण्य अनुगुणानि विविधानि पठनतन्त्राणि बोधनरीतयश्च प्रयुज्यन्ते चेत् पठनाधिगमः प्राप्तुं शक्यते।
- एकैकस्य समग्रविकासं (All round development) लक्ष्यीकृत्यैव पठनप्रक्रिया निश्चेतव्या।

## १.४. पठनाधिगमाः (Learning outcomes)

विविधैः विषयैः सह क्रियमाणानां प्रवर्तनानां फलरूपेण ज्ञानं शेषी, मनोभावाः / मूल्यानि च छात्रे रूपवत्कुर्वन्ति। एषु केचित् ह्रस्वकालेन, केचित् दीर्घकालेन चार्जिताः भवेयुः। एवं छात्रेषु आवश्यकानि परिवर्तनानि पूर्वमेव निश्चेतुं शक्यानि। पाठ्यपद्धतेः आसूत्रणसमये विद्यालयीयविद्याभ्यासरूपेण विविधस्तरेषु छात्रैः प्रापणीयानि लक्ष्याणि एव पठनाधिगमाः इति गण्यन्ते। केषांचन पठनप्रवर्तनानां श्रेणिभिः एकैकस्मात् एककात् प्रापणीयाः पठनाधिगमाः विकासं प्राप्य एकस्याः कक्ष्यायाः अन्ते प्रापणीयपठनाधिगमत्वेन परिणमन्ति। पठनाधिगमानां वैशिष्ट्यं किमिति चेत् ते निरीक्षणविधेयाः (Observable) मापनीयाः (Measurable) चेत्येतदेव। एकैकस्यापि एककस्य कक्ष्यायाः स्तरस्य चान्ते छात्रैः प्रापणीयं ज्ञानं, शेषीः, मूल्यानि, मनोभावाः प्राप्तानि वा इति निर्णेतुं पठनाधिगमानां विशकलनेन साध्यते। पाठ्यपद्धतेः समुचितेन विनिमयेन सर्वेषां छात्राणां पठनाधिगमः दृढीकर्तुं शक्यते।

पठनाधिगमानां विशेषः एवं संग्रहीतुं शक्यते।

यथा -

- विषयाधिष्ठितेन पठनेन पठितृभिः आर्जनीयं ज्ञानं (Knowledge) शेषीः (Skills) मनोभावाः/ मूल्यानि (Attitudes and values) इत्यादीनां समवाय एव भवेत् पठनाधिगमः।
- पठनाधिगमाः निरीक्षणीयाः (Observable) तथा मापनीयाः (Measurable) च भवेयुः।
- ह्रस्वेन दीर्घेण च कालेन आर्जिता भवेयुः पठनाधिगमाः।

## १.५. पठनविभवाः पठनसंविधानानि

पाठ्यपद्धतेः विनिमयाय उपयुक्ताः विविधाः घटका एव पठनविभवाः। पठनप्रक्रियायाः परिपूर्णतायै पठनविभवानाम् उपयोगाः आवश्यकाः।

- पुस्तकालयः
- परीक्षणशाला (गणितम् शास्त्रम् (Maths, Science)
- पठनोपकरणानि
- प्रदर्शनफलकानि

- संगणकयन्त्रपरीक्षणशाला (Computer lab)
- विविधोपयोगसमर्थानि उपकरणानि।
- एतद्विना छात्राणां शेषीः प्रकटयितुं बहवः मञ्चाः विद्यालये सन्ति किल। एते अपि पठनाधिगमान् अधिगन्तुं प्रयोक्तव्याः।
- बालसभा
- विद्यालयसभा
- समितयः
- चर्चामञ्चः
- पठनयात्रा
- सन्नद्धसंघटना (SPC, NSS, Scout, NCC etc)

  छात्राणां संपूर्णविकासाय एतादृशघटकाः अत्यन्तम् अपेक्षिताः।

## १.६. संकलितविद्याभ्यासः (Inclusive education)

*विद्यालये उत्कृष्टप्रकटने समर्थस्य सहपाठिनः वासाय गृहं नास्ति, पथि वर्तमानानां नालिकानां मध्ये पाशेन निबद्धानां पटानामधस्तात् एवास्य कुटुम्बः वसति इति च प्रत्यभिज्ञानं छात्राणां मध्ये चर्चाविषयकमभूत्। केवलं मिथः दुःखकथनेन एतद्विषयः न परिह्रीयेत, इत्यवगम्य ते छात्राः अध्यापकानां साहाय्येन समाहृतं द्रव्यमुपयुज्य तस्मै गृहमेकं निर्माय यच्छन्ति।*
*-(विद्यालयानुभवः)*

कक्ष्यायां सर्वेषां समायोजनेन कस्यापि निवर्तनेन विना च पठनाय अन्तरिक्षं कल्पनीयम्। अस्माकं विद्यालयेषु प्रधानतया विभागद्वयस्यापि परिगणनां साहाय्यं, श्रद्धां च दत्वा नीतिपूर्वकः गुणोत्कर्षविद्याभ्यासः (Equitable quality education) कल्पनीयः।

- विशेषश्रद्धायाः पठनसहायस्य परिरक्षायाः आवश्यकता च केषाम्?
- सामाजिकैः आर्थिकैः च कारणैः बहिष्कृताः बालाः बालिकाश्च।
- व्यत्यस्ते विविधे च सामाजिकसांस्कृतिककुटुम्बपश्चात्तले विवेचनमनुभूयमानाः छात्राः।

अतीव दारिद्र्यमनुभूयमानाः गिरिजनाः बालिकाः, अनुसूचितजातिवर्गयुक्ताः देशान्तरगताः, स्थिरतया वासस्थानरहिताः इत्येवं क्लेशमनुभूयमानाः बहवः अन्तर्भवन्ति। परिमितीः वैजात्यानि च विविच्य ज्ञात्वा तान् अङ्गीकुर्यात् तथा बहुमन्येत इति भवेदस्माकं छात्रान् प्रत्युपगमः।

विद्यालये क्रियमाणैः समूहप्रवर्तनैः एतेषां क्लेशाः परिहर्तुं शक्यते।

- शारीरिकमानसिकसमस्याः अभिमुखीक्रियमाणाः छात्राः।

शारीरिकमानसिकसमस्याः अभिमुखीक्रियमाणानां पठनप्रयासमनुभवानां च छात्राणां प्रत्येकपठनस्य आवश्यकता अस्ति। (Special educational needs) श्रवणे न्यूनता, दृष्टिपरिमितिः, बौद्धिकपरिमितिः चलनपरिमितिः, पठनन्यूनता, *ओटिसं* (Autism), मस्तिष्कविघातः (Cerebral palsy) बहुमुखवैकल्यानि वैकारिकासन्तुलितावस्थायुक्ताः च एषु अन्तर्भवन्ति।

पाठ्यपद्धतेः विनिमयाय के के मार्गाः अस्माभिरनुवर्तनीयाः?

- पठनावश्यकानि, अभिरुचिः इत्येतानि परिगण्य पठनप्रवर्तनासूत्रणम्।
- पठनप्रवर्तनेषु छात्राणां सर्वेषामपि भागभागित्वं लब्धुं पाठासूत्रणस्य अनुरूपीकरणम्।

छात्राणां सर्गशेषीः बुद्धेः विविधतलाञ्च उद्दीपयितुं च समुचितरीत्या सूचनासांकेतिकविद्यायाः (ICT) साध्यताः प्रयोक्तव्याः। अस्याः प्रयोगः जिज्ञासाप्रवर्धकः पठनविषयं प्रति तात्पर्यजनकश्च भवेत्। इन्द्रियपरिमितिमनुभूयमानानां एषा साध्यता अतीव प्रयोजनप्रदा भवेत्। अनेन दृश्यश्राव्यरूपेण विषयान् अनुभववेद्यं कर्तुं शक्यन्ते। व्यत्यस्तपठनशैलीः परिगण्य पठनानुभवान् दातुम् अनया शक्यते।

**अध्यापनसंहिता (Teaching manual)**

पठनाधिगमान् लक्ष्यीकृत्य प्रत्येकम् अध्यापकः सर्गात्मकरीत्या प्रवर्तनानि आसूत्रयितुं प्रभवेत्। पाठपुस्तके अध्यापकमित्रे च दत्तानि प्रवर्तनानि स्वस्य कक्ष्यायाः अनुरूपेण आवश्यकान् अंशान् परियोज्य प्रक्रियापुटम् आयोजनीयम्। एकैकं पठनाधिगमम् आप्तुं सहायकानि प्रवर्तनानि आसूत्रणे अन्तर्भावनीयानि।

- प्रवर्तनेन सह मूल्यनिर्धारणमपि अन्तर्भाव्य एव प्रक्रियापुटं लेखनीयम्।
- निरन्तरमूल्यनिर्णयेन लभ्यमानायाः सूचनायाः अङ्कनमेव प्रतिकरणपुटे आवश्यकम्।

एकस्य सप्ताहस्य कृते सज्जीकृता अध्यापनसंहिता विद्यालयीयप्रकृष्टसङ्घे (SRG)

विषयसमित्यां (Subject Council) च अवतारणीया। एकसप्ताहात्मकस्य प्रतिकरणपुटस्य सूचनाः आधारीकृत्य प्रतिफलनटिप्पणिं लिखित्वा SRG / SC मध्ये अध्यापकैः चर्चा करणीया। अस्याः टिप्पण्याः आधारेण अध्यापकस्य भाविनि आसूत्रणानि युक्तानि भवन्ति। अध्यापनसंहितायाः प्रारूपम् अधोदत्तम्।

| **अध्यापनसंहिता** |
|---|
| पाठस्य नाम -<br>दिनाङ्कः -<br>प्रतीक्षितः समयः -<br>पठनाधिगमः -<br>आशयः -<br>शेषीः -<br>भाषावस्तुताः-<br>व्यहाररूपाणि-<br>मूल्यानि, सामग्र्यः -<br>प्रतीक्षितानि उत्पन्नानि- |

| **प्रक्रियापुटम्** | **निर्धारणपुटम्** |
|---|---|
| प्रवर्तनेन मूल्यनिर्णयेन च युक्ता प्रक्रिया | निर्धारणसूचनाः अत्र लेखनीयाः |

प्रथमाध्यापकस्य हस्ताक्षरम्

अध्यापकस्य / अध्यापिकायाः हस्ताक्षरम्

| प्रतिफलनात्मिका चिन्ता (Reflection) मम अधिगमः निर्णयश्च |
| --- |
| (पठनप्रवर्तनानां मूल्यनिर्धारणप्रक्रिया द्वारा लब्धानां सूचनानाम् आधारेण।<br>•<br>•<br>•<br>अनुस्यूतप्रवर्तनानि परिहारप्रवर्तनानि।<br>•<br>•<br>• |

प्रतिफलनात्मिका चिन्ता - पूर्वं निश्चितान् पठनाधिगमान् अनुसृत्य निर्वहणं कृतानां प्रवर्तनानां पूर्तीकरणानन्तरमेव प्रतिफलनात्मिकचिन्ता टिप्पणी सज्जीकरणीया।

- पूरिताः टिप्पण्यः प्रतिवारं SRG योगे अवतारणीयाः।
- अनुस्यूतासूत्रणाय दिशाबोधदानम्।
- सत्रस्य निरन्तरमूल्यनिर्णयश्रेणीक्रोडीकरणम्।

# संस्कृतभाषोपगमः।

भारते विविधाः भाषाः सन्ति। तासु भाषासु श्रेष्ठा मातृतुल्य च भवति संस्कृतभाषा। अस्याः भाषायाः पठनेन भारतस्य संस्कृतिं पैतृकं च यथावत् ज्ञातुं शक्यते। २०१४ (चतुर्दशाधिकद्विसहस्रम्) वर्षादारभ्य प्रथमकक्ष्यातः संस्कृतपठनाय केरलीयानां छात्राणां अवकाशः लब्धः इति कार्यं सन्तोषदायकं भवति। अस्माकं मातृभाषायां प्रादेशिकभाषायां च बहूनि संस्कृतपदानि सन्ति इत्यतः केरलीयछात्राणां कृते संस्कृतपठनं सुकरमेव।

आधुनिकेऽस्मिन् भारते बहवः संस्कृतग्रामाः सन्ति। संस्कृतग्रामाणां संख्या वर्धते प्रतिवर्षम्। आधुनिकविषयान् अधिकृत्यापि बहवः ग्रन्थाः संस्कृते प्रतिदिनं जायन्ते। आधुनिकसाङ्केतिकविद्यायामपि संस्कृतभाषायाः स्वाधीनं सुष्ठु वर्तते। अतः संस्कृतपठनस्यावश्यकता अधिकतया वर्तते।

प्राथमिकस्तरे संस्कृतपाठपुस्तकानां रचनासमये पूर्वोक्तानि कार्याणि गणनीयानि भवन्ति। अस्माकं जीविते प्रतिदिनं श्रूयमाणानि संस्कृतपदानि ज्ञातुम् अवगन्तुं वक्तुं च छात्राः शक्ताः भवेयुः। संस्कृते आशयान् व्यक्ततया लेखितुम् अवतारयितुं च छात्राः शक्ताः भवेयुः।

संस्कृते वर्तमानाः वर्धमानाः च बालसाहित्यग्रन्थान् स्वयं पठितुं ज्ञातुम् अस्वदितुं च छात्राः समर्थाः भवेयुः।

अस्मिन् हस्तपुस्तके प्रतिस्तरं छात्रैः आर्जयितुं योग्यानि कार्याणि / उद्देश्यानि पूर्वमेव निश्चितानि सूचितानि च भवन्ति। तानि उद्देश्यानि सफलीकर्तुं योग्यानि प्रवर्तनानि अध्यापकेन कक्ष्यासु उपस्थापनीयानि। पर्याप्तं सन्नाहीकरणम् अध्यापकेन कृतं भवेत्। स्वयमेव पठितुं छात्राः शक्ताः भवेयुः। तदर्थं योग्याः अवसराः देयाः। तान् अवसरान् यथावत् प्रयोक्तुं छात्राः प्रेरितव्याः। एवं चेत् ते सर्गात्मकरचनाः कुर्वन्ति। सर्गात्मिकतया प्रेरिताः ते ज्ञाननिर्माणे व्यापृताः भविष्यन्ति।

लक्ष्येषु प्राधान्यमर्हति संस्कृतं प्रति छात्रेषु प्रीत्युत्पादनम्। तत्कार्ये अध्यापकः श्रद्धावान् भवेत्। इदानीं विद्यार्थिकेन्द्रीकृतकक्ष्यायाः प्राधान्यमेव वर्तते। छात्रेषु सत्क्रियत्वं स्थापनीयम्।

छात्राः सत्क्रियाः भवन्तु। तदर्थं योग्यानि पठनतन्त्राणि कक्ष्यासु प्रयोक्तव्यानि। छात्राणां जीवितेन सह बद्धानि नूतनानि तन्त्राणि प्रयोक्तव्यानि। छात्रान् संस्कृते भाषणाय प्रेरयतु। तदानीं जायमानाः प्रयासाः अध्यापकेन दूरीकरणीयाः। तदर्थमध्यापकेन

१. छात्राणां नैपुणीं ज्ञातुं यत्नः क्रियताम्। यद्यत्र न्यूनताः सन्ति चेत् ताः दूरीकर्तुं यत्नः कार्यः।

२. नैपुणीनां पोषणाय नूतनाः सन्दर्भाः समायोजनीयाः।

३. छात्रेभ्यः नूतनाः अनुभवाः देयाः।

संस्कृतपठनं मातृभाषया प्रदेशिकभाषया च पठनाय सहायकं भवति। बाल्ये अनेकाः भाषाः पठितुं छात्रेषु नैसर्गिकी शक्तिः अधिकतया प्रतिभाति इति विद्याभ्यासविचक्षणाः वदन्ति। अतः संस्कृतपठनेन अधिकं ज्ञानमार्जयितुं शक्यते। भाषासाहित्ये इव संस्कृतसाहित्येऽपि छात्राणां तात्पर्यं प्रोत्साहनीयम्। छात्राणां रुचिं तात्पर्यं च ज्ञात्वा अध्यापकेन नूतनः सन्दर्भः कक्ष्यासु आयोजनीयः भवेत्।

भिम्नरुचयः भवन्ति जानाः छात्राः च। तेषां ज्ञानार्जनेऽपि व्यतियानमस्ति। छात्राणां स्वांशीकरणपाटवम् अध्यापकेन ज्ञातं भवेत्। स्थिरे दृढे च ज्ञाने नूतनं ज्ञानम् अधिगन्तव्यम्। अनार्जिते उद्दिष्टे ज्ञाने नूतनं ज्ञानम् उत्पादयितुं न शक्यते। इमं तत्त्वं ज्ञात्वा अध्यापकेन उचितः सन्नाहः कार्यः।

पठनं नाम स्वाभाविकी अनवरता काचन प्रक्रिया भवति। ज्ञाननिर्माणे व्यापृते छात्रे अहं पठामि इति प्रतीतिः कदापि न जायेत। पठनम् आनन्ददायकं भवतु। अतः नैसर्गिकप्रक्रिया इव भाषास्वाधीनशक्तिः संभवतु। भाषाशेषीः आर्जयति, न तु पठति इति प्रतीतिः उत्पादनीया।

भाषां न पठति, किन्तु आर्जयति। स्वयंपठनाय छात्रान् प्रेरयतु। अनुकूले सन्दर्भे छात्राः स्वयमेव पठन्ति। अनेकैः पठनप्रवर्तनैः छात्राः स्वाध्यायाय उत्सुकाः भवेयुः। उत्साही छात्रः वाचयति, लिखति, आस्वादयति, पुस्तकानि पठति च। क्रीडासु तात्पर्यमिव पठनेऽपि तात्पर्यं छात्रेषु उत्पादनीयम्। 'यस्तु क्रियावान् पुरुषः स विद्वान्' इत्यस्ति प्रमाणम्। अनुभवानामाधारे आर्जितस्य ज्ञानस्य मूल्यनिर्णयमपि सः करिष्यति। एवं स्वयं रचनायै सामर्थ्यसम्पादनाय प्रोत्साहनम् अध्यापकेन देयम्। ■

# मूल्यनिर्णयोपगमः

पठनं नाम छात्रेषु स्वाभाविकतया नैरन्तर्येण च प्रचलन्ती एका मानसिकप्रक्रिया भवति। पठनानुभवाः उद्देश्याधिष्ठिताः तथा पठनाधिगमानाधारीकृत्य च यदि भवेयुः तर्हि पठनमपि कार्यक्षमं भवेत्। छात्रैः स्वायत्तीकरणीयाः शेषीः अवबोधांश्चाधिकृत्य अध्यापकः उद्बुद्धः भवेत्। एकैकस्य पाठभागस्य अधिगमाः (Learning outcomes) विभाव्यैव पठनप्रवर्त्तनानि आसूत्रणीयानि। आसूत्रितानि प्रवर्तनानि जीवितसन्दर्भैः सह योजयित्वा अवतारयितव्यानि।

एवं स्वायत्तीकृताः शेषयः धारणाश्च पठनाधिगमान् प्रबलयितुं कियन्मात्रमुपकुर्वन्ति? पठनाधिगमान् पूर्णतया स्वायत्तीकर्तुं के के छात्राः अवशिष्यन्ते? तेभ्यः देयाः पठनानुभवाः के? ते अनुभावाः कथं देयाः? इत्यादयः चिन्ताः एव अध्यापकं मूल्यनिर्णयप्रक्रियां नयति।

## मूल्यनिर्णयस्य वैविध्यम्।

एकस्य पाठभागस्य/एककस्य विनिमयानन्तरं किमधिगतमिति निर्णेतव्यम्। अस्याः प्रक्रियायाः एव पठनसम्बन्धिमूल्यनिर्णयः (Assessmet of learning) इति नाम। पाठभागस्य पठनानन्तरं पठितुः प्रकर्षः पठनस्य स्तरः इत्यादयः अत्र निर्णीयन्ते। एषा प्रक्रिया मूल्यनिर्णयस्य एकं तलमेव भवति। साधारणतया मूल्य- निर्णयः इत्यनेन एष एवार्थः बहुभिः कल्प्यते। परं स्थूणानिखननन्यायेन पठनस्य दृढीकरणार्थं क्रियमाणस्य मुल्यनिर्णयस्यैव अधिकं प्रामुख्यं कल्पनीयम्। एष एव राज्यान्तरस्तरीयः मूल्यनिर्णयालोकः। पठनसमय एव पठनस्य कार्यक्षमतार्थम् अध्यापकेन, इतरेण, सहपाठिना एव वा क्रियमाणः व्यवहाराः भवेयुः। पठनेन सह एतादृशः मूल्यनिर्धारणः प्रतिक्रियादीनां च मूल्यनिर्णयस्य अपरं तलं भवति। अस्यैव पठनार्थं मूल्यनिर्णयः (Assessment for learning) इति नाम। एषः पठनपुरोगत्यै निरन्तरं निर्वहणीयः भवति तथा पठनप्रवर्तनेन सह ओतप्रोतः च भवति।

पठनेन स्वायत्तीकृतान् आशयान् धारणांश्च स्वयंविमर्शनात्मकतया निरीक्षणं, परिणतीनाम् अवगमञ्च निरीक्ष्य एका शोधकप्रक्रिया अप्यस्ति। अस्यैव स्वयंमूल्यनिर्णय इति वदामः। एवं स्वयं मूल्यनिर्णयेनापि पठनं साध्यं भवति। अस्यैव मूल्यनिर्णय एव पठनम् (Assessment as learning) इति नाम। पठनम् अधिकं कार्यक्षमतया निर्वहणीयं चेत् पठनार्थं मूल्यनिर्णयः, मूल्यनिर्णयः एव पठनम् इत्येतयोः अधिकं प्रामुख्यं कल्पनीयम्। एवं रीत्या पठनं फलप्रदं कर्तुं

मूल्यनिर्णयप्रक्रियायाः प्रामुख्यदायकः उपगमः एव अस्माभिः स्वीकरणीयः भवति।

## मूल्यनिर्णयोपगमः।

पठनाधिगमान् दृढीकर्तुमुद्यतः पठनोपगमः स्वीकर्तव्यः अस्ति। अतः पठनाधिगमानां दृढीकरणात्मकः मूल्यनिर्णयोपगमः (Outcome focused assessment) एव स्वीकर्तव्यः। पठनाधिगमान् आधारीकृत्य क्रियमाणेषु पठनप्रवर्त्तनेषु पठितुः सजीवसहभागता ध्रुवं भवति। विमर्शनात्मिका चिन्ता पठनस्य प्रतिफलनं प्रकटनञ्च मिथः बन्धितं ज्ञानम् इत्येतानि एव पठनाधिगमानाधारीकृतस्य पठनस्य विशेषताः।

## मूल्यनिर्णयनैरन्तर्यं समग्रता च। (CCE)

विद्यालयस्तरे निरन्तरं समग्रं च मूल्यनिर्णयं निर्दिशति। पठनं नाम छात्रेषु अनुस्यूतं वर्तमाना प्रक्रिया। अत एव मूल्यनिर्धारणप्रक्रिया च अनुस्यूतं भवेत्। छात्राणां वैज्ञानिकः सामाजिकः वैकारिकश्च विकास एव समग्रविकासः इत्यनेन बुध्यते। मूल्यनिर्धारणप्रक्रियायाः समग्रता तथा अनुस्यूतता च दृढयितुं समग्रः तथा निरन्तरमूल्यनिर्णये (CCE) प्रधानतया क्षेत्रद्वयं परिगणनीयम्।

## CCE क्षेत्रम् ।

१. वैज्ञानिकक्षेत्रे विकासात्मकः मूल्यनिर्णयः।

२. सामाजिक-वैकारिकक्षेत्रे विकासात्मकः मूल्यनिर्णयः।

**एतयोः विशदांशाः।**

१. वैज्ञानिकक्षेत्रविकासात्मकः मूल्यनिर्णयः। (प्राथमिकस्तरः)

छात्रेण पठनीया सर्वे विषया वैज्ञानिकक्षेत्रे अन्तर्भवन्ति। भाषा-शास्त्र-गणित-समाजशास्त्र-कला-प्रवृत्ति आरोग्य-कायिकपठनानि अस्मिन् अन्तर्भवन्ति एकैकस्मिन् विषये पठनाधिगमान् अवगम्य कियत्परिमितं स्वायत्तीकृतमिति निर्धारणं करणीयम्। अत्र द्विविधः मूल्यनिर्णयः निर्दिष्टः।

१. निरन्तरमूल्यनिर्णयः (CE)

२. सत्रान्तमूल्यनिर्णयः (TE)

## निरन्तरमूल्यनिर्णयः ।

प्राथमिकस्तरे भाषाविषयाणां पठनम् अनेकासां शेषीनामार्जनाय प्रचलति। परम् अस्मिन् पठने आशयाः वस्तुताः विविधानि वैज्ञानिकक्षेत्राणि सृजनात्मकरचनाः इत्यादीनि वैविध्यपराणि उद्दानानि सन्ति। एतानि विहाय भाषाशेषिनिर्णयः दुष्करः भवति। श्रुत्वा पठित्वा च कार्यग्रहणं, कथित्वा लिखित्वा च प्रकटनं, सर्गात्मकरचनानिर्वहणम् इत्यदीनि भाषापठनेन प्रवर्धयन्ति। अतः भाषापठनस्य केवलशेषिः अथवा विज्ञानसम्पादनम् इति रूपेण पृथक्करणम् असाध्यं भवति।

प्रथमद्वितीयकक्ष्ययोः विषयवस्तूनि (themes) आधारीकृत्यैव भाषा, परिस्थितिपठनं, गणितम् इत्यादिषु विषयेषु प्रवर्त्तनानि आयोजितानि। अतः अनयोः कक्ष्ययोः उद्दानक्षेत्ररूपेण उपयुक्तानि विषयवस्तूनि प्रदिशामः। वाचिकानां लिखितानाञ्च शेषीनां विकासे प्राथमिकस्तरीयाः भवन्ति छात्राः इत्यतः उचितः आलेखनक्रमः स्फुटवाचनं श्रवणं, भाषणं, लेखनम् इत्यादिषु प्रवर्धनं लिपिविन्यासविशेष इत्यादीनि भाषानैपुणीनां प्राथमिकस्तरत्वेन परिगणनीयानि।

शास्त्रविषयेषु आशयरूपीकरणस्य एकैकस्मिन् स्तरे अर्पिताः आशयधारणाः स्वायत्तीकृताः नैपुण्यः च परिगणनीयाः।

अत्र निरन्तरमूल्यनिर्णयः त्रिविधः निर्दिष्टः।

- प्रक्रियायाः मूल्यनिर्णयः।
- सञ्चितपुटानां मूल्यनिर्णयः। (Port folio)
- एककस्तरमूल्यनिर्णयः (एकैकस्मिन् एकके साकल्येन पठनाधिगमानां मूल्यनिर्णयः।)

एते विशदीक्रियन्ते।

## प्रक्रियायाः मूल्यनिर्णयः

पठननिर्वहणसमये प्रक्रियायाः मूल्यनिर्णयं प्राधान्यमर्हति। पठनप्रक्रियायाः अङ्गीभूतानि सर्वाणि प्रवर्तनानि निर्धारणीयानि । तद्वत् अवश्यं साहाय्यमपि करणीयम्। प्रत्येकस्मिन् आशयरूपवत्करणस्तरे छात्रस्य आशयधारणाः तेन स्वायत्तीकरणीयाः शेषीः च निर्धारयितव्याः। एककानां प्रकृतिमनुसृत्य स्वयंमूल्यनिर्णयस्य पारस्परिक मूल्यनिर्णयस्य अध्यापकमूल्यनिर्णयस्य

च सूचकानि सम्पाद्य उपयोक्तुं शक्यते। प्रक्रियायाः मूल्यनिर्णयार्थम् अधोदत्तानि सूचकानि उपयोक्तव्यानि।

१. प्रवर्त्तनेषु भागभागित्वम्।

२. आशयधारणा।

३. नैपुणीनाम् आर्जनम्।

४. प्रकटनम् / अवतारणम्।

५. प्रमाणीकरणम् / सज्जीकरणम्।

सामाजिकवैकरिकक्षेत्रेषु नैपुणीनां मूल्यनिर्धारणमपि प्रक्रियायाः मूल्यनिर्णयस्य भागत्वेन सञ्चालयितव्यम्। प्रक्रियायाः वैशिष्ट्यं निर्धार्य अङ्कदानार्थं सामाजिकवैकारिकक्षेत्रेषु आर्जिताः नैपुणीः परिगणनीयाः। तदर्थम् उपयुक्तेषु पञ्चसूचकेषु विविधानां नैपुण्यः विकासः कियन्मात्रम् इति निर्धारणं पर्याप्तं भवेत्।

| **सूचकाः** | **नैपुण्यः** |
|---|---|
| प्रवर्तनेषु भागभागित्वम् | स्वयम् अवगमनम्, नेतृत्वेशेषिः,<br>व्यक्त्यन्तरनैपुणी, उत्तरवादित्वबोधः |
| आशयः/धारणा | पठननैपुण्यः |
| शेषीनामार्जनम् | निर्णयस्वीकारः प्रश्नपरिहारशेषिः,<br>सर्गात्मकशेषिः |
| प्रकटनम् / अवतारणम् | आशयविनिनयशेषिः |
| प्रमाणीकरणम् / सज्जीकरणम् | विमर्शनात्मिका चिन्ता |

प्रक्रियामूल्यनिर्णयस्य सूचकानामाधारेण तानि निर्धार्य अध्यपकस्य निर्धारणपुटे पठनप्रवर्तनानामायोजनसमय एव आवश्यकं प्रामाणीकरणं कर्तव्यम्। छात्राणां टिप्पणिपुस्तिका प्रक्रियामूल्यनिर्णयार्थं पठनरेखारूपेण उपयोक्तव्या। सत्रान्ते अङ्कत्वेन परिवर्त्य तदर्थं निश्चिते प्रारूपे (format) योजनीयम्।

## सञ्चितपुटानां मूल्यनिर्धारणम्।

पठनमधिकृत्य छात्रेभ्यः रक्षितृभ्यः, अध्यापकेभ्यश्च प्रतिक्रियादानम् (feed back) एव सञ्चितपुटस्य धर्मः। प्रक्रियेयं पठनं त्वरितं करोति। पठनप्रवर्त्तनेषु व्यापृते सति मूर्तमापन्नानि सर्वाणि उत्पन्नानि सञ्चितपुटे अन्तर्भाव्य निर्धारणीयानि। विषयबन्धिता पठनरेखा अस्मिन्नन्तर्भवति। (मम कथापुस्तकम्, मम शब्दकोशः च)

सञ्चितपुटानाम् उदाहरणानि अधः प्रदत्तानि।

- टिप्पणिपुस्तिका
- इतराः रचनाः (वैयक्तिकरचनाः, सांस्कृतिकरचनाः)
- इतराः पठनरेखाः (चित्राणि, समाहरणानि)
- पठनरेखानिर्धारणार्थं छात्रैः रूपवत्कृता सूचकाः।
- सर्गात्मकरचना।
- प्रवृत्तिपुटानि। (work sheets)
- एककनिर्धारणरेखाः।
- सञ्चितपुटनिर्धारणार्थम् अधोदत्तानि सूचकानि उपयोक्तुं शक्यन्ते।
- आशयव्यक्तता अनुयोज्यता च।
- धारणानां स्वांशीकरणम्।
- तन्मयतया अवतारणम्।
- समग्रता।
- प्रामाणीकरणस्य अनुस्यूतता।

प्रक्रियानिर्धारणं सञ्चितपुटनिर्धारणम् इत्येतेषु प्रत्येकं सूचकम् अतिप्रकृष्टम् / प्रकृष्टम्/ माध्यम् / प्रकर्षणीयम् इत्येवं मानं कृत्वा यथाक्रमं ४ / ३ / २ / १ इति अङ्का गणनीयाः। पठनप्रक्रियायां पठितुः प्रकटनं मूर्तीकृतानि उत्पन्नानि इत्येतानि निर्धारयितुम् अध्यापनसंहिता (Teaching manual) पठितुः टिप्पणीपुस्तिका इत्यादीनाम् उद्ग्रानानि उपयोक्तुम् अध्यापकः प्रभवति।

## १. पाठासूत्रणरेखायाः परामर्शानां विशदांशाः।

पठनानुभवान् सूक्ष्मतले आसूत्रयितुं निरन्तरमूल्यनिर्णयं शास्त्रीयतां कर्तुं च पाठासूत्रणं करणीयम्। तदर्थं अध्यापनसंहितायाः (Teaching manual) स्वरूपं परिष्करणीयमस्ति। अध्यापनसंहारेषु अधोदत्ताः घटकाः अन्तर्भावयितव्याः।

- पठनाधिगमाः
- आशयः / धारणाः
- शेषिः
- मूल्यानि / मानोभावः
- पठनसामग्र्यः।
- प्रतीक्षितानि उत्पन्नानि
- समयः
- प्रवर्तनमूल्यनिर्णययुक्तः प्रक्रियापुटः, निर्धारणांशप्रतिपादितः निर्धारणपुटश्च।
- निर्धारणपुटस्य अंशान् आधारीकृत्य भावनाटिप्पणी, छायाटिप्पणी।

## २. विषयबन्धितटिप्पणिपुस्तिकासम्बन्धिनः विशदांशाः।

वैज्ञानिकक्षेत्रस्य मूल्यनिर्णयार्थम् उपयोक्तव्यं मुख्यं प्रमाणमस्ति पठितुः टिप्पणिपुस्तिका। प्रथमद्वितीयकक्ष्यासु पठनप्रक्रियामनुसृत्य विविधानां प्रवर्तनानां पूर्तीकरणाय टिप्पणीपुस्तिका सहायिका भवति। टिप्पणीपुस्तिकाद्वारा पठनाधिगमान् प्राप्तुमवसरं छात्राः लभन्ते। प्रथमद्वितीयकक्ष्यायां छात्राः कियन्मात्रं पठनाधिगमान् सम्पादितवन्तः इति निर्धारयितुमपि टिप्पणीपुस्तिका सहायिका भवति।

तृतीयतः पञ्चमीकक्ष्यापर्यन्तं कक्ष्यासु पठनं कार्यक्षमं कर्तुं विषयबन्धिता टिप्पणिपुस्तिका आवश्यकी भवति। तद्वारा पाठपुस्तकस्थानां प्रवर्तनानाम् अतिग्रहणेन छात्राः पठनाधिगमान् सम्पादयन्तीति निर्णेतुम् अध्यापकः प्रभवति। अत एव तृतीयचतुर्थपञ्चमकक्ष्यासु विषयबन्धिताः टिप्पणिपुस्तिकाः निर्धारणार्थं परिगणनीयाः। षष्ठी सप्तमी अष्टमी कक्ष्यायाः कृते विषयबन्धितानि

टिप्पणिपुस्तकानि आवश्यकानि। पठितुः सर्गात्मकता, चिन्ताप्रक्रिया, भाषानैपुणी इत्याद्याः टिप्पणीपुस्तके प्रतिफलनीयाः भवन्ति। पाठभागस्य विनिमयाय आयोजितानि तन्त्राणि तेषां पूर्तीकरणार्थं पठितुः सन्नद्धता, प्रवर्तनपुटानां विविधस्तरेषु सान्निध्यम् इत्याद्याः सर्वाः सूचनाः टिप्पणीपुस्तके भवेयुः। प्रवर्त्तनद्वारा मूर्तीकृतानि उत्पन्नानि अधिकृत्य विशदांशाः अपि अस्मिन् पुस्तके एव प्रमाणीकरणीयाः।

अध्यापिका अधिगमान् यथासमयं निर्धार्य पठनपुरोगत्यै आवश्यकः निर्देशः साहाय्यं च दद्यात्। अध्यायस्यावसाने तत्सम्बन्धिनः अधिगमान् पठिता कियन्मात्रं स्वायत्तीकृतवानिति निर्धारणार्थमपि प्रमाणत्वेन टिप्पणीपुस्तकं परिगणनीयम्। आशयव्यक्तं सन्दर्भानामाशयानां चानुयोज्यं परामर्शसहितं स्वकीयचिन्ताप्रतिफलकं स्वांशीकृतं च भवेत् टिप्पणीपुस्तकम्। कार्याणि तन्मयतया अवतारणीयानि। आशयस्य चिन्तायाश्च समग्रतया आविष्कारः अनुस्यूतः परस्परबन्धितश्च परामर्शः इत्यादीनां प्रतिफलनात्मकं भवेत् टिप्पणीपुस्तकस्य प्रमाणीकरणाम्।

**एककस्यमूल्यनिर्णयः।**

विविधान् पठनाधिगमान् परस्परबन्धेन विन्यस्यमानः घटकः भवति एककम्। अस्यैका समग्रा प्रकृतिरस्ति। एकस्य एककस्य निर्धारणेन एकां समग्रां प्रकृतिमेव निर्धारयति। वाचिकः मूल्यनिर्णयः प्रश्नोत्तरं विवृतपुस्तकमूल्यनिर्णयः प्रश्नसज्जीकरणम् उत्तरसूचिकावगमनं, नूतनी रचना, निर्धारणम् इत्यादीनि लिखितमूल्यनिर्णयेन सह परिगणनीयानि। निश्चिते एकके पठानाधिगमानां विषये छात्राः कुत्र तिष्ठन्ति इत्यवगन्तुं सहायकाः मानमापकाः उपयोक्तव्याः। एककस्य मूल्यनिर्णयार्थं सूचितानाम् आधारेण अङ्कान् दत्वा सत्रान्ते निश्चितरूपरेखायां प्रामाणीकरणीयम्। एकस्मिन् सत्रे एकाधिकम् एककस्य मूल्यं निर्धारणीयम् इत्यतः एककमूल्यनिर्णयस्य माध्यमेव (AVERAGE) सत्रान्ते योजनीयम्। अत्रोपयुक्तस्य उपकरणस्य प्रकृत्यनुसारीणि सूचकानि अध्यापकेन आयोजनीयानि। एवम् आयोजनावसरे पठनाधिगमः कियन्मात्रं स्वायत्तीकृतः इत्यस्य प्रामुख्यं देयम्। त्रयाणाम् एषां मूल्यनिर्णयानाम् अङ्कस्यानुपातिकतय श्रेणीः दत्वा एव छात्राणां निरन्तरमूल्यनिर्णय श्रेण्याः परिगणनाः। कलापठनम्, प्रवृत्तिपठनम्, आरोग्यकायिकविद्याभ्यास इत्येतेषां विषयाणामपि एवं रीत्या श्रेणी देया।

## निरन्तरमूल्यनिर्णयश्रेण्याः रीतिः।

प्रत्येकं विषयस्य प्रक्रिया, सञ्चितपुटम्, एककतलमूल्यनिर्णयः इत्येतेषु एकैकस्य अङ्काः दशांशत्वेनावगत्य तेषां योगनिर्णयः कार्यः। अस्यानुपातिकी श्रेणी अधोदत्तां पट्टिकामुपयुज्य अवगन्तव्या।

| अङ्कः | शतमानम् | श्रेणी |
|---|---|---|
| ३० | | |
| २३-३० | ७५-१०० | A |
| १८-२२ | ६०-७४ | B |
| १४-१७ | ४५-५९ | C |
| १०-१३ | ३३-४४ | D |
| दशतः न्यूनम् | ३३ तः न्यूनम् | E |

उदाहरणार्थं यस्य छात्रस्य संस्कृतभाषायाः प्रक्रिया, सञ्चितपुटः एककमूल्यनिर्णयः इत्येतेषाम् अङ्काः यथाक्रमं ८, ७, ७, इति चिन्तयन्तु, तर्हि योगः ८ + ७ + ७ = २२ भवति। पट्टिकानुसारं संस्कृतस्य निरन्तरमूल्यनिर्णयश्रेणी B भवति।

## सत्रान्तमूल्यनिर्णयः (TE)

प्राथमिकस्तरे भाषाविषयाणां सत्रे परिगणितानाम् एककानां पठनाधिगमान् आधारीकृत्य व्यवहाररूपाणि भाषावस्तुताः भाषाशेषीः इत्येतानि क्षेत्राणि परिगण्यैव सत्रे मूल्यनिर्णयः भवेत्। उद्दानक्षेत्रस्य नैपुण्याश्च प्रामुख्यं दत्वा विविधानि प्रश्नरूपाणि अत्रायोजनीयानि। शास्त्रविषयाणां सत्रे परिगण्यमानानाम् एककानाम् उद्दानक्षेत्राणि आधारीकृत्य पठनाधिगमस्य प्रामुख्यदायकानि आशयनैपुण्यादीनि मापयितुं पर्याप्तान् प्रश्नान् सज्जीकृत्य सत्रान्तमूल्यनिर्णयः करणीयः। प्रत्येकम् एककस्य / आशयक्षेत्रस्य अनुयोज्यं प्रामुख्यं दत्वा विविधेषु तलेषु मानसिकप्रक्रियाणाम् (ज्ञानम्, अपग्रथनम्, निगमनम्, प्रयोगः) अनुरूपं प्रामुख्यं दत्त्वा च एकं परिनिष्ठापत्रं (Blue Print) सज्जीकृत्य विविधान् प्रश्नान् अत्र सन्तीति निर्णीयैव प्रश्नपत्राणि सज्जीकरणीयानि। प्रश्नानाम् अनुयोज्यानि सूचकानि आयोजनीयानि। तदनुसारेण मूल्यनिर्णयः निर्वहणीयः।

कलापठनम्, प्रवृत्तिपठनम्, आरोग्यविद्याभ्यासः इत्येतेषां विषयाणां सत्रान्तमूल्यनिर्णयः, प्रकटनमूल्यनिर्णयरूपेण (Performace assessment) निर्वहणीयः। तेषां सहाय्यकरूपाणि हस्तपुस्तके दत्तानि।

## मूल्यनिर्णयार्थं विविधानि प्रारूपाणि (format)

प्राथमिकस्तरे कक्ष्याशिक्षकरीतिरेव अस्माकं राज्ये प्रचलति स्म। अतः कक्ष्याशिक्षकस्य प्रमाणीकरणम् अतीवक्लिष्टं भवति। (F1) प्रारूपम् एकस्मिन् सत्रे एकवारं प्रमाणीकृत्य निरन्तरमूल्यनिर्णयश्रेणी सत्रान्तमूल्यनिर्णयश्रेणी च अस्मात् प्रारूपात् वार्षिकक्रोडीकरणप्रारूपे (F3) परिवर्त्य प्रमाणीकर्तुं शक्यते। परन्तु विषयकेन्द्रीकृतरूपेण यदि कक्ष्या सञ्चाल्यते तर्हि (F2) प्रारूपे प्रमाणीकृत्य वार्षिकक्रोडीकरणप्रारूपे (F4) परिवर्त्य योजनीयम्। प्राथमिकस्तरे मलयालं विहाय अन्यभाषाध्यापकाः विषयकेन्द्रीकृतप्रारूपम् उपयुज्य प्रमाणीकुर्वन्तु। प्रतिसत्रं समानानि प्रारूपाणि उपयोक्तुं शक्यन्ते।

## श्रेणीकरणप्रणाली ।

प्रथमतः सप्तमीपर्यन्तं कक्ष्यासु निरन्तरमूल्यनिर्णयस्य श्रेणीकरणप्रणाली एव अधुना प्रचाल्यते। सा प्रणाली पुनरपि प्रथमतः अष्टमीपर्यन्तं कक्ष्यासु अनुवर्तनीया। अतः निरन्तरमूल्यनिर्णयस्य त्रयाणामपि विभागानां अङ्कान् अवगत्य तस्य योगस्य आनुपातिकं श्रेणीकरणं पर्याप्तं भवेत्। प्रत्येकं विषयस्य निरन्तरमूल्यनिर्णयः सत्रान्तमूल्यनिर्णयः इत्येतयोः प्रत्येकं श्रेणीकरणाय अधोदत्ता पञ्चबिन्दुमापिका उपयोक्तव्या।

| अङ्काः / शतांशः | श्रेणी |
|---|---|
| ७५-१०० | A |
| ६०-७४ | B |
| ४५-५९ | C |
| ३३-४४ | D |
| ३३तः अधः | E |

## मूल्यनिर्णयः - वार्षिकक्रोडीकरणं (प्राथमिकस्तरः)

सत्रत्रयेऽपि छात्रेण सम्पादिताः प्रकृष्टाः श्रेणीः/अङ्काः एव निरन्तरमूल्यनिर्णयस्य समग्रा श्रेणी। प्रथमे सत्रे यदि एकः न्यूनश्रेणीं लभेत परं पठने पुरोगतिं प्राप्ते निरन्तरमूल्यनिर्णये

प्रकर्षं स्वायत्तीकरोति तस्य कृते प्रयोजकः भवतु इति सङ्कल्पेन एव एवं निर्वहति। किन्तु एवं श्रेण्यः वर्धिताः इति निरीक्षणं शक्तं कर्तव्यम्।

प्रतिविषयं CE समग्रश्रेणी CE पट्टिकायां TE श्रेणी TE पट्टिकायां च प्रमाणीकरणीयम्। सामजिक वैकारिकक्षेत्राणां मूल्यनिर्णयः प्रत्येकं पट्टिकायम् अङ्कनीयः। छात्रेषु प्रकृष्टा नैपुणी वार्षिकक्रोडीकरण- प्रारूपे अङ्कनीया।

## सामाजिक-वैकारिकक्षेत्राणां मूल्यनिर्णयः (प्राथमिकस्तरम्)

वैज्ञानिकक्षेत्रस्येव सुप्रधानं भवति सामाजिकवैकारिकक्षेत्राणां मूल्याङ्कनम्। सङ्घरूपेण जीवितुं (Learning to live together) वैयक्तिकप्रकर्षं सम्पादयितुं (Learning to be) च युक्ता नैपुणी अत्र परिगणनीया। अपि च पठनशैलीः तन्त्राणि चान्तर्भूता पठननैपुणीसमार्जनं च अस्य क्षेत्रस्य भागत्वेन निर्णेतव्यम्। सामाजिकवैकारिक क्षेत्राणां मूल्यनिर्णयसम्बन्धिन्यः नैपुण्यः अधः प्रदत्ताः ताः एव निर्णेतव्याः।

१. आशयविनिमयशेषिः (communication skill)

२. स्वयं बोधः (self management skill)

३. नेतृत्वशेषिः (leadership skill)

४. व्यक्त्यन्तरनैपुणी (interpersonal skill)

५. निर्णयस्वीकारः (decision making skill))

६. उत्तरवादित्वबोधः (sense of responsibility)

७. विमर्शनात्मिका चिन्ता (critical thining skill)

८. सर्गात्मकशेषिः (creative thinking skill)

९. प्रश्नपरिहारशेषिः (Problem solving skill)

१०. पठननैपुण्यः (study skills)

एतासां मूल्यनिर्णयः छात्रस्य सामाजिक-वैकारिकविकसनं प्रबलीकर्तुं सहाय्यकं भवेत्। वैज्ञानिकक्षेत्रे विषयान् पाठयन्तः अध्यापकाः एव एषां मूल्यनिर्णयमपि कुर्युः। एकैकस्य विषयस्य प्रक्रियायाः निर्धारणस्य भागत्वेन अयं मूल्यनिर्णयः अपि करणीयः। अत्र प्रवर्तनेषु भागभागित्वम् इति सूचकम् उपयुज्य मूल्यनिर्णयस्य भागत्वेन स्वयं ज्ञातं नेतृत्वशेषिः व्यक्त्यन्तरनैपुणी,

उत्तरवादित्वबोधः इत्यादीन्यपि निर्णेतव्यानि। आशयधारणा इति सूचकमुपयुज्य मूल्याङ्कनस्य भागत्वेन पठननैपुणी अपि निर्णेया। शेषीनामार्जनम् इति सूचकेन सह निर्णयस्वीकारः प्रश्नपरिहरणशेषिः सर्गात्मकशेषिः इत्याद्याः निर्णेतव्याः। अवतारणं प्रकटनम् इति सूचकमुपयुज्य निर्णयेन सह आशयविनिमयशेषिः निर्णेतव्या। प्रमाणीक रणं / सज्जीकरणम् इति सूचकमुपयुज्य विमर्शनात्मिका चिन्ता निर्णेतव्या।

सामाजिकवैकारिकक्षेत्रे पठितुः उत्कर्षसम्बन्धीनि कार्याणि अवगत्यप्रमाणीकरणार्थं श्रद्धा देया। प्रतिलोमपरामर्शलेखनार्थं नैव निर्दिशति। प्रत्येकं पठितुः गुणपरा नैपुणी प्रोत्साहनीया। तदधिकृत्य प्रमाणीकरणम् अध्यापनसहितायां करणीयम्। अयं मूल्यनिर्णयः प्रत्येकं पट्टिकायां गुणात्मकतया वार्षिकक्रोडीकरणप्रारूपे अङ्कनीयः। तदर्थं प्रारूपे प्रत्येकं पङ्क्तिः योजिता। पठितुः पुरोगतिपत्रेऽपि एतत्सम्बन्धिप्रमाणीकरणाय अवकाशः देयः।

## अध्यापकमित्रं नाम किम्? किमर्थम्?

अधिकाराधिष्ठितविद्याभ्यासः इति लक्ष्यं सम्पादयितुं छात्राणं सर्वतोमुखविकासाय अयोजिता इयं परिष्कृता पाठ्यपद्धतिः। एतदनुसारं पठनप्रवर्तनस्य आसूत्रणे निर्वहणे च सामर्थ्यसम्पादनाय मूल्यनिर्णयप्रवर्तनानाम् आसूत्रणे निर्वहणे अध्यापकान् शक्तान् कर्तुं साहाय्यं भवति इदम् अध्यापकमित्रम्।

अस्मिन् पुस्तके पठनाधिगमाः पठनप्रवर्तनानि मूल्यनिर्णयोपाधयः अधिकवाचनांशः प्रवर्तनपुटानि इत्यादीनि कार्याणि अन्तर्भवन्ति। अधिकपठनाय साध्यतायाः उपयोगक्रमः पाठासूत्रणानि वार्षिकासूत्रणं च अस्मिन् आयोजितम्। पठनाधिगमानां प्राप्त्यर्थं यानि यानि प्रवर्तनानि आवश्यकानि तानि सर्वाणि सफलीकर्तुं स्वातन्त्र्यम् अध्यापकानाम् अस्ति।

प्रत्येकम् अध्यापकः, पूर्वोक्तरीत्या छात्राणां पठनं सफलम् कर्तुं यतताम्। तदर्थं अध्यापकमित्रं सप्रयोजकं भूयाद्।

## वार्षिकासूत्रणम्

| सत्रं | मासः | पाठः | अनुबन्धप्रवर्तनानि |
|---|---|---|---|
| पादवार्षिकमूल्यनिर्णयः | **जूण्** | 1. हे चित्रपतगाः | सिद्धताक्रीडा।<br>गानम्।, वर्णलेपनम्।<br>कैरल्याम् आशयकथनम्। |
| | **जूलय्** | 2. कुक्कुटशाबकः | अनुवाचनम्<br>चित्राणां पदानां च योजनम्।<br>वर्णलेपनम्। |
| | **आगस्ट्** | 3. तव इष्टं किम्<br><br>4. विद्यालयः | शाकानां परिचायनम्।<br>नाटकावतरणम्।, चर्चा।<br>गानम्। |
| | **सेप्तम्बर्** | विद्यालयः (अनुवर्तते)<br><br>5. काकः शशारिः च | कैरल्यामाशयकथनम्<br>वर्णैः लेपनम्।, अक्षरलेखनम्।<br>उच्चैः वाचनम्।, उत्तरकथनम्। |
| अर्धवार्षिकमूल्यनिर्णयः | **ओक्टोबर्** | काकः शशारिः च<br>(अनुवर्तते)<br><br>6. संख्याक्रीडा। | अक्षरैः पदपूरणम्।<br>मातृभाषया साभिनयं कथनम्।<br>चित्रं वर्णैः लेपनम्।<br>आशयग्रहणम्। |
| | **नवम्बर्** | संख्याक्रीडा (अनुवर्तते)<br>7. जननी जन्मभूमिश्च | संख्यागणना।, बिन्दूनां वर्णलेपनम्।<br>अनुवाचनम्। |
| | **डिसम्बर्** | जननी जन्मभूमिश्च<br>(अनुवर्तते)<br>8. सुभाषितानि | आशयग्रहणम्।<br>बिन्दुयोजनेन अक्षरलेखनम्। चर्चा।<br>आलपनम्। |
| | **जनुवरि** | सुभाषितानि (अनुवर्तते)<br>रिक्तस्थानपूरणम्।<br>9. क्रीडामः तुष्यामः | मातृभाषायामाशय कथनम्।<br><br>गानम्, चित्रेण सह योजनम्।<br>वर्णैः लेपनम्। |
| वार्षिकमूल्यनिर्णयः | **फेब्रुवरि** | 10. रामदासस्य कौशलम्<br><br><br>11. भगवद्गीता | कथावाचनम्।, मातृभाषया<br>आशयकथनम्।, बिन्दुयोजनेन<br>अक्षरलेखनम्।<br>वाचनम्।, आशयग्रहणम्। |
| | **मार्च्** | भगवद्गीता (अनुवर्तते)<br>आवर्तनम् | श्लोकचयनम्।<br>आवर्तनम्। |

प्रथमः पाठः

# हे चित्रपतगाः

## आमुखम्

शिशवः स्वयं चित्रपतगाः इव भवन्ति। ते सर्वदा विविधपुष्पैरलङ्कृतेषु उद्यानेषु भ्रमितुं उत्सुकाः भवन्ति। शिशवः प्रायेण चित्रपतगैः साकं मैत्रीं स्थापयितुम् इच्छन्ति। चित्रपतगादीनां स्मरणम् अपि शिशूनाम् उत्साहवर्धकः भवति। तदर्थम् आयोजितम् अस्ति 'हे चित्रपतगाः' इति शिशुगीतम्। अनेन छात्राणां प्रकृतिस्नेहः, निरीक्षणकौशलं, पदसम्पत्तिः च वर्धन्ते। प्रथमसप्ताहे छात्राणां पठनप्रेरणादायिकाः काश्चन सरसक्रीडाः आयोजितव्याः। तदनन्तरं पाठप्रवेशः कार्यः। प्रथमकक्ष्यायां दत्ताः सिद्धताक्रीडाः द्विदीयकक्ष्यायामपि प्रयोक्तुं शक्यन्ते। अध्यापकस्य औचित्यमनुसृत्य नूतनाः सिद्धताक्रीडाः अपि आयोजितव्याः।

| | | |
|---|---|---|
| पाठस्य नाम | - | हे चित्रपतगाः |
| कालांशः | - | 16 |
| उद्देश्यम् | - | संस्कृतगीतपठनम्, पदपरिचयः।<br>नामपरिचयः गानालपनकौशलम्।<br>प्रकृतिनिरीक्षणे तात्पर्यः। |

**आशयाः/ धारणाः/ व्यवहाररूपाणि।**

1. बालकविता।
2. उद्यानपरिचयः, जीवजालैः सह मैत्रीसम्पादनम्।
3. कवितालपने तात्पर्यम्।
4. अक्षराणां परिचयः, पदानाम् उच्चारणम्।
5. सुपरिचितानां जीवजालानां संस्कृतनामानि।

## पठनप्रवर्तनानि/पठनतन्त्राणि

1. कवितालपनम्।
2. उद्यानं निरीक्ष्य जीवजालानाम् प्रत्यभिज्ञानम्।
3. नामपदानां परिचयः।
4. चित्ररचना।
5. चार्ट्पत्रे पट्टिकाकरणम्।
6. सान्द्रमुद्रिका साहाय्येन बालकविता परिचायनम्
7. अनुप्राणितचित्रं साहाय्येन (Animation) कविता परिचायनम्

## पठनाधिगमाः

1. बालकवितां सतालम् अनुगायति।
2. कवितायाम् अन्तर्गतानि पदानि लिखति।
3. पाठभागे चित्रीकृतानां जीवजालानां संस्कृतनामानि वदति।

**प्रवर्तनम् -1**

**उद्देश्यम्** - **सतालं गानालपनम्।**

**प्रक्रिया** - अध्यापकः कक्ष्यां प्रविश्य छात्रैः सह कुशलप्रश्नं करोति।

यथा - तव गृहं कुत्र अस्ति?
गृहे के के सन्ति?
गृहं परितः किं किमस्ति?

तेषाम् उत्तराणि सश्रद्धं शृणोति च। 'कस्य, गृहे उद्यानमस्ति?" इति पृच्छति, 'केचन हस्तमुन्नयन्ति। अस्माकं पुस्तके अपि एकं मनोहरम् उद्यानमस्ति, पश्यन्तु' इति वदति अध्यापकः। छात्राः सर्वे पुस्तकस्थम् उद्यानं पश्यन्ति च।

"पुस्तके विद्यमाने उद्याने किं किं वर्तते?" इति प्रश्नस्य उत्तररूपेण, बालकः, बालिका, पुष्पाणि चित्रपतगाः, चिक्रोडः इत्यादीनि उत्तराणि ददति। छात्रैः उक्तानां प्रादेशिकभाषापदानां स्थाने अध्यापकः संस्कृतपदानि योजयति।

'चित्रपतगैः साकं के के मैत्रीम् इच्छन्ति?' इति पृच्छति। प्रायेण सर्वे छात्राः अहमहम् इति वदेयुः। प्रादेशिकभाषायां परिचितानां चित्रपतगसम्बद्धगीतानाम् आलपनाय तान् प्रेरयति।

पुस्तके विद्यमानं गीतम् अध्यापकः द्विवारम् उच्चैः आलपति। छात्राः ससूक्ष्मम् अक्षराणि, पदानि च परिचिन्वन्ति। अनन्तरम् एकैकस्याः पङ्क्तेः आलपनं कृत्वा अन्वालपनाय छात्रान् प्रेरयति च। एवं पङ्क्तिद्वयं, सम्पूर्णं गीतम् इति क्रमेण अभ्यासं कारयति। छात्रान् संघान् कृत्वा गीतस्य आलपनम्, तालपरिवर्तनं कृत्वा आलपनम् च कारयति।

**मूल्यनिर्णयसूचिकाः** - उच्चारणव्यक्तता, तालात्मकता, भागभागित्वम्।

**प्रवर्तनम् -2**

**उद्देश्यम्** - **आशयकथनम्।**

**प्रक्रिया**

गीतालपनानन्तरम् अध्यापकः गीतस्य अर्थं कैरल्यां वदति। पाठपुस्तके दत्तम् आशयं पठित्वा कैरल्यां विशदयति। पदानि विविच्य अर्थान् बोधयति च।

**प्रवर्तनम् 3**

**उद्देश्यम्** - **नूतनपदानां परिचयः।**

**प्रक्रिया**

ഉദ്യാനത്തിൽ വന്ന ബാലിക മനോഹരങ്ങളായ ചിത്രശലഭങ്ങളെ കണ്ടിട്ട് ഉത്സാഹത്തോടുകൂടി പറയുന്നു- പൂവിൽ നിന്ന് പൂവിലേക്കു സഞ്ചരിക്കുന്നവരായ അല്ലയോ സുന്ദരന്മാരായ കൂട്ടുകാരേ!, നിങ്ങളുടെ മനോഹരമായ രണ്ടുചിറകുകളെ ഞാൻ തൊടട്ടേ.

अध्यापकः पुस्तके विद्यमानस्य उद्यानस्य चित्रं प्रदर्श्य चित्रे किं किमस्ति इति पृच्छति। छात्राः पाठपठनसमये परिचितान् शब्दान् स्मृत्वा वदन्ति। अनेन उद्यानसम्बद्धपदानां परिचयं सिद्ध्यति।

| |
|---|
| चित्रपतगः, बालकः, चिक्रोडः, वृक्षः, बालिका<br>लता, खगः, पुष्पम्, पर्णम् |

**मूल्यनिर्णयसूचिकाः** - पदज्ञानम्, उच्चारणम् अर्थग्रहणं च।

**प्रवर्तनम् 4**

**उद्देश्यम्** - **चित्रानुसारं पदयोजनं अर्थग्रहणं, पदज्ञानं च।**

**प्रक्रिया**

अध्यापकः चार्ट्पत्रे एकस्मिन् पार्श्वे चित्राणि, अपरस्मिन् पार्श्वे तेषां नामानि च (क्रमराहित्येन) विलिख्य स्थापयति। अनन्तरं चित्रस्य उचितं नामपदं वदन्तु छात्राः। एवं चित्रे विद्यमानानां वस्तूनां संस्कृतपदपरिचयं सिद्ध्यति। पुस्तके अपि यथोचितं योजयतु इति अध्यापकः निर्दिशति।

**मूल्यनिर्णयसूचिकाः** -
भागभागित्वम्।
पदानामुच्चारणम्।
उचितपदस्वीकारः।
नामानां चित्राणां च विविच्य ज्ञानम्।
समुचितवर्णस्वीकारः। समीचीनवर्णलेपनम्।

उत्तराणि यथाक्रमं-खगः, सूनम्, चिक्रोडः, चित्रपतगः च।

**प्रवर्तनम् -5**

**उद्देश्यम्** - **वर्णलेपने तात्पर्योत्पादनम्।**

**प्रक्रिया**

अध्यापकः चित्रमुद्दिश्य चित्रे किमस्ति इति पृच्छति। संस्कृतपदानां कथनाय प्रेरयति च। बिन्दूनां योजने उचितवर्णस्वीकरणे च निर्देशाः अध्यापकेन देयाः।

**मूल्यनिर्णयसूचिके** - बिन्दूनां उचितयोजना, उचित वर्णसङ्कलनम्।

## अधिकविस्तरः

चित्रपतगमधिकृत्य कैरल्यां परिचितानां गीतानां समाहरणाय निर्दिशति अध्यापकः। उदाहरणमेकं प्रदर्शयति

"പൂവുകൾ തെണ്ടും പൂമ്പാറ്റേ
പൂന്തേനുണ്ണും പൂമ്പാറ്റേ
ആരു നിനക്കീ ചിറകേകി
ആരു നിനക്കീ നിറമേകി"

## उद्याननिर्माणम्

चित्रपतगानां चिक्रोडानां च मैत्रीं सम्पादयितुम् उत्तमः मार्गः भवति उद्याननिर्माणम्। तदर्थम् एकम् उद्यानं विद्यालये रचयन्तु छात्राः। उद्याने पुष्पाणां नामानि संस्कृतभाषया प्रादेशिकभाषया च लिखित्वा स्थापयन्तु। उद्यानस्य जलसेचनं, परिपालनम् इत्यादीनि कार्याणि कुर्वन्तु छात्राः।

## विविधानि पुष्पाणां नामानि

कमलम्, मल्लिका, चम्पकम्, कुमुदम्, सेवन्तिका, जपापुष्पम्, सूर्यकान्तिः, शङ्खुपुष्पम्, अशोकम्, पाटलम्, कर्णिकारः, पारिजातं च।

## द्वितीयः पाठः

# कुक्कुटशावकः

### आमुखम्

कथाश्रवणे कुतुकिनः भवन्ति बालाः। पूर्वकाले प्रतिगृहं वृद्धजनाः आसन्। ते तु कथायाः उपदेशानां च भण्डागाराः आसन्। तेषां सततसम्पर्केण बालेषु विनयादिगुणाः संपुष्टाः आसन्।

उक्तं च -

"अभिवादनशीलस्य
नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते
आयुर्विद्या यशोबलम्।।" (इति।

अद्य अणुपरिमितायां कुटुम्बव्यवस्थायां स्थितिः परिवर्तिता। दूरदर्शने अनुप्राणितरूपेण (आनिमेषन्) कथाः अवतार्यन्ते। तासां सान्द्रमुद्रिकाः अपि सुलभाः। तथापि संस्कृतकथाश्रवणे अवसराः परिमिताः। तत्परिहारार्थं विद्यालयेषु संस्कृतकथा श्रवणाया अवसराः सज्जीकरणीयाः। संस्कृतकथाश्रवणे, कथापुस्तकवाचने च छात्रेषु औत्सुक्यं स्रष्टव्यम्। सत्कथाः छात्रान् विद्याविनयसम्पन्नान् कुर्वन्ति।

**कालांशः** - 16

**उद्देश्यानि** - संस्कृतकथाश्रवणे तात्पर्यवर्धनम्। केषाञ्चन पक्षिणां मृगाणां च नामानि परिचिन्वन्ति छात्राः। कथाकथनसामर्थ्यं लभन्ते। कथां लघुनाटकरूपेण अवतारयितुं सामर्थ्यं लभन्ते।

**पठननैपुण्यम्** - कथाकथनसामर्थ्यम्। केषाञ्चन पक्षिमृगादीनां नामलेखनसामर्थ्यम्। अक्षरपरिचयः - क, ख, ग, घ, ङ। उ इत्यक्षरस्य चिह्नपरिचयः। क्रियापदपरिचयः। अक्षरस्फुटतया सम्भाषणसामर्थ्यम्। अभिनयसामर्थ्यम्।

### आशयाः/ धारणाः/ व्यवहाररूपाणि।

कथापरिचयः। कुटुम्बे माता पिता पुत्रादयः च सन्ति। मातृभाषायां वदति। कथायाः तत्वं विवेचयति। कथान्तर्गतानि पदानि विवेचयति। क्रियापदानि गृह्णाति। पदेषु अक्षराणि विवेचयति। प्रश्नवाचकान् परिचिनोति। क, ख, ग, घ, ङ इति अक्षराणि परिचिनोति। मातापित्रोः वचनानि अनुसर्तव्यानि।

### पठनप्रवर्तनानि/पठनतन्त्राणि

कैरल्यां कथाकथनं पात्रपरिचायनं क्रियापदपरिचायनं च। कथावाचनम् अनुवाचनं च। कथायाः लघुनाटकरूपेण अवतारणम्। चित्रयोजनम्। उचितपदयोजनम्। वर्णलेपनम्। अक्षरलेखनम्। वीरमार्जारः इति अनुप्राणितसान्द्रमुद्रिकायाः प्रदर्शनम्।

### पठनाधिगमाः

कथाकथनसामर्थ्यम्। पक्षिमृगादीनां नामलेखनसामर्थ्यम्। अक्षरपरिचयः क, ख, ग, घ, ङ। उ इत्यक्षरस्य चिह्नपरिचयः। अक्षरस्फुटतया सम्भाषणसामर्थ्यम्। अभिनयसामर्थ्यम्।

**प्रवर्तनम् -1**

**उद्देश्यम् - कैरल्यां कथाकथनम्।**

**प्रक्रिया**

अध्यापकः छात्रान् पृच्छति - कस्य कस्य गृहे पितामहः अस्ति? कस्य गृहे पितामही अस्ति? ते कथां जानन्ति वा? आम् इति छात्राः वदन्ति। ते कथां कथयन्ति वा? आम् इति छात्राः वदन्ति। अनन्तरम् अध्यापकः वदति "यः कथां जानाति सः उत्थाय उचितभावेन कथां कथयतु"। केचन छात्राः उत्तिष्ठन्ति। तेषु एकम् आहूय अध्यापकः कथा कथनाय

प्रेरयति। सः कथां कथयति। अध्यापकः तम् अभिनन्दति। तदनन्तरम् अध्यापकः अन्येभ्यः छात्रेभ्यः अपि कथाकथनाय अवसरान् ददाति। ते एकैकः इति क्रमेण कथां कथयन्ति। अन्ये छात्राः श्रद्धापूर्वं श्रृण्वन्ति। अध्यापकः सर्वान् अभिनन्दति।

**मूल्यनिर्णयसूचिकाः - ** उचितभावः, अक्षरस्फुटता, सभाकम्प विना कथनम्।

**प्रवर्तनम् 2**

**उद्देश्यम् - पात्रपरिचायनं क्रियापदपरिचायनं च।**

**प्रक्रिया**

अध्यापकः प्रथमं कुक्कुटः, कुक्कुटी, श्येनः, शुनकः शाबकः इति क्रमेण चित्राणि प्रदर्श्य परिचायनं करोति। एषः कुक्कुटः। एषा कुक्कुटी। एषः श्येनः इति क्रमेण। तदनन्तरं तिष्ठति, उपविशति, गच्छति, आगच्छति, डयते, वसति, भवति, गृह्णाति इत्यादीनां क्रियापदानां परिचायनं करोति। तदर्थं कैरलीपदानि प्रयुङ्क्ते। अध्यापकः वदति - "रमेश, भवान् उत्तिष्ठतु"। रमेशः उत्तिष्ठति। ततः अन्यान् छात्रान् पृच्छति - रमेशः किं करोति? "तिष्ठति" इति छात्राः वदन्ति। अन्यानि क्रियापदानि अपि एवं परिचाययति अध्यापकः।

**मूल्यनिर्णयसूचिके - ** औचित्यं, नामानां क्रियापदानां च ज्ञानम्।

**प्रवर्तनम् 3**

**उद्देश्यम् - कथावाचनम् अनुवाचनं च।**

**प्रक्रिया**

अध्यापकः अक्षरस्फुटतया उचितभावेन च एकवारं कथां वाचयति। छात्राः श्रद्धापूर्वं श्रृण्वन्ति। ततः अध्यापकः खण्डशः वाक्यानि वाचयित्वा अनुवाचनाय छात्रान् प्रेरयति। छात्राः अनुवाचनं कुर्वन्ति। ततः अध्यापकः छात्रान् सङ्घान् करोति। एकैकं सङ्घम् अनुवाचनाय प्रेरयति। अनन्तरं कः सोत्साहम् उत्तिष्ठति एकैकं तं छात्रम् अनुवाचनाय प्रेरयति, मूल्यनिर्णयं करोति च। उत्तमया रीत्या ये अनुवाचयन्ति ते अभिनन्दनीयाः।

**मूल्यनिर्णयसूचिके - ** अक्षरस्फुटता, उचितभावः।

**प्रवर्तनम् 4**

**उद्देश्यम् - कथायाः लघुनाटकरूपेण अवतारणम्।**

अध्यापकः छात्रान् पृच्छति - अस्यां कथायां कति कथापात्राणि सन्ति? छात्राः गणनां कृत्वा प्रधानकथापात्राणां संख्यां वदन्ति। "वयम् एतां कथां नाटकरूपेण अवतारयामः। तदर्थम् एकं, द्वे, त्रीणि, चत्वारि इति गणनां कृत्वा सङ्घाः भवेम"। छात्राः तथा कुर्वन्ति। अनन्तरं कथानुसारं कैरल्यां सम्भाषणाय छात्रान् निर्दिशति। "कुक्कुटी शाबकान् किम् उपदिशति स्म? एकः शाबकः किम् उपदिशति स्म? एकः शाबकः किम् अवदत्? श्येनेन गृहीतः शाबकः किम् उक्त्वा विलपति स्म? मातृसमीपं प्राप्तं शाबकं माता किम् अवदत्? इत्यादीन् प्रश्नान् पृष्ट्वा छात्राणां सम्भाषणचातुरीं परिपोषयतु अध्यापकः। सः छात्रैः उक्तानां सम्भाषणानां संस्कृतपरिवर्तनं कृत्वा चार्ट्पत्रे विलिख्य प्रदर्शयतु च (कैरळीलिपिमुपयुज्य)। तस्याः आशयमपि परिचाययतु। तदनन्तरम् एकैकं सङ्घम् आहूय नाटकावतरणाय निर्दिशतु। अध्यापकः यथोचितं साहाय्यं करोतु। अवतारणानन्तरं तान् सङ्घान् अभिनन्दतु।

**मूल्यनिर्णयसूचिकाः -** उचितभावः, अक्षरस्फुटता, भागभगित्वम्।

## मातृका

## कुक्कुटशाबकः (लघुनाटकम्)

(एका कुक्कुटी शाबकैः सह भक्षणाय अटति। शाबकेषु एकः अविनयः अस्ति। तस्य नाम चिक्कुः।

कुक्कुटी - कोक्करे को को। पुत्राः सर्वत्र शत्रवः सन्ति। सावधानं गन्तव्यम्।
मम पार्श्वात् दूरं न गच्छन्तु।
कोक्करे को को।

शाबकाः - कियो, कियो। एवमेव। कियो, कियो।

चिक्कुः - कियो, कियो। अहम् अतीव समर्थः। यदि शत्रवः मम समीपम्
आगच्छन्ति तर्हि कौशलानि उपयुज्य रक्षां प्राप्तुं शक्तः।

कुक्कुटी - कोक्करे को। गुरुजनानाम् उपदेशः अनुसरणीयः।
नो चेत् आपत्सु पतिष्यति। मया सहैव आगच्छतु।

(सर्वे अटन्ति। चिक्कुः भक्षणाय पृथक् अटति। तत्समये केरवृक्षे एकः श्येनः उपविशति।)

श्येनः - (मनोगतम्) अहो! अहो! प्रियभक्षणं लब्धम्।

एषः मम आहारः।)

(सः भूतलम् अवतरति। चिक्कुं गृहीत्वा उद्गच्छति।)

चिक्कुः - (दीनस्वरेण) कियो, कियो। रक्ष माम्। रक्ष माम् कियो। कियो।

(तत्समये एकः शुनकः आगच्छति)

शुनकः - (उच्चैः) भौ, भौ, भौ। मोचय तम्। मोचय तम्। भौ, भौ, भौ।

(सद्यः श्येनस्य पादाभ्यां चिक्कुः अधः पतति। सः मातृसमीपं धावति।

चिक्कुः - कियो, कियो। मातः। मम मातः।

कुक्कुटी - कोक्करे को। कोक्करे को। मम पुत्र।
इतः परं मम वचांसि अनुसर।

चिक्कुः - आम् मातः। निश्चयेन

सर्वे - (मिलित्वा) पितरौ अनुसरणीयौ।

**प्रवर्तनम् - 5**

**उद्देश्यम्** - चित्रयोजनम्।

**प्रक्रिया**

अध्यापकः पाठपुस्तके चतुर्दशतमे पुटे दत्तं प्रवर्तनं विशदीकरोति। एकैकं चित्रं तत्सम्बद्धेन पदेन सह योजयितुं निर्दिशति। पदानां वाचनं च एकवारं करोति। अनन्तरं छात्राः चित्रं पदं च यथोचितं योजयति।

**मूल्यनिर्णयसूचिके -** पदानां अर्थग्रहणम्। चित्रैः सह योजनम्।

उत्तराणि : - (दक्षिणभागे) कोकिलः, काकः, शुनकः च। (वामभागे) श्येनः, कुक्कुटः, कुक्कुटशाबकः च।

**प्रवर्तनम् 6**

**उद्देश्यम्** - उचितपदयोजनम्।

**प्रक्रिया** :-

पाठपुस्तके चतुर्दशतमे पुटे एकं प्रवर्तनम् अस्ति। कोष्ठके दत्तं चित्रं दृष्टवा तस्य नाम रिक्तस्थाने लिखतु इति।

**यथा -**

| | | |
|---|---|---|
| चपलः | शाबकः | दूरं गच्छति। |
| शाबकं | श्येनः | गृह्णाति। |
| शुनकः | उच्चैः | भषति। |

**मूल्यनिर्णयसूचिकाः -** पदानाम् अर्थग्रहणं, लेखनसामर्थ्यम्, अक्षरशुद्धिः।

**प्रवर्तनम् -7**

**उद्देश्यम्** - वर्णलेपनम्। (पुटसंख्या -15)

**प्रक्रिया** :-

बिन्दून् योजयित्वा वर्णलेपनाय निर्दिशतु अध्यापकः। छात्राः तथा कुर्वन्तु।

**मूल्यनिर्णयसूचिकाः -** औचित्यं, वर्णलेपनसौन्दर्यम्, श्रद्धा।

**प्रवर्तनम् 8**

**उद्देश्यम् - उत्तरलेखनम्।**

**प्रक्रिया**

अध्यापकः छात्रान् समेत्य "भवतां संस्कृताध्यपकः कः? भवतां नामानि कानि? भवतां इष्टतमाः क्रीडाः काः?" इत्यादीन् विविधान् प्रश्नान् पृच्छति। छात्राः यावच्छक्यम् उत्तराणि वदन्ति। तदनन्तरं अध्यापकः पाठपुस्तकस्थान् प्रश्नान् वाचयति। तेषाम् उत्तराणां कथनाय निर्दिशति। छात्राः उत्तराणि न वदन्ति चेत् आशयं विशदीकरोतु अध्यापकः। अनन्तरम् उत्तरलेखनाय प्रेरयतु।

1. कः चपलः भवति?
   कुक्कुटशावकः चपलः भवति
2. श्येनः कं गृह्णाति?
   श्येनः कुक्कुटशावकं गृह्णाति।
3. कथायाः तत्त्वं किम्?
   कथायाः तत्त्वं पितरौ अनुसरणीयौ इति।

**मूल्यनिर्णयसूचिकाः -** औचित्यम्, आशयावबोधः, अक्षरशुद्धिः।

**प्रवर्तनम् 9**

**उद्देस्यम्** - **अक्षरलेखनम्।**

**प्रक्रिया**

बिन्दून् योजयित्वा अक्षराणां लेखनं कुर्वन्तु छात्राः। ततः क ख, ग, घ, ङ इति अक्षराणि उपयुज्य पदानां पूरणम्।

शुकः काकः, खगः, नखं गजः, उरगः

घनः मेघः, पतङ्गः, विहङ्गः, इत्यादीनि।

पाठपुस्तके पञ्चदशे पुटे बिन्दून् योजयित्वा पदानां पूर्णरूपेण लेखनाय निर्दिशतु। तद्यथा - शुनकः काकः, कुक्कुटः।

**मूल्यनिर्णयसूचिके -** अक्षरज्ञानम्, उचितरीत्या लेखनम्।

**साहायकग्रन्थाः-** पञ्चतन्त्रम्, हितोपदेशः, ईसोप्प्कथाः इत्यादीनि पुस्तकानि।

**सान्द्रमुद्रिका -** वीरमार्जारः (विश्वसंस्कृतप्रतिष्ठानम्)

तृतीयः पाठः

# तव इष्टं किम्?

## आमुखम्

भाषाः सर्वाः व्यवहाराय भवन्ति। आशयविनिमये सम्भाषणस्य प्रमुखं स्थानमस्ति। अत एव भाषापाठनसन्दर्भे सम्भाषणस्य श्रवणार्थं, प्रयोगार्थं च अवसराः कल्पनीयाः। शाकानां स्वपरिचायनपराः सम्भाषणांशाः एव अत्र पाठरूपेण दत्ताः। सम्भाषणरूपेण, सम्भाषणगीतरूपेण च पाठस्य पाठनं कुर्वन्तु अध्यापकाः।

कालांशः - 12

**उद्देश्यम्** - सम्भाषणांशान् श्रुत्वा आशयमवगच्छति।
लघुवाक्यैः सम्भाषणं कर्तुं यतते। शाकानां नामानि परिचिनोति।
अक्षराणां लेखनपरिचयं प्राप्नोति।

नैपुणी - लघूनि संभाषणवाक्यानि प्रयुङ्क्ते। शाकानां नामानि जानाति, विवेचयति च। अक्षराणि लिखति, वदति च।

**आशयाः/ धारणाः/ व्यवहाररूपाणि।**

सम्भाषणगीतम्। शाकानां नामपरिचयः। पदानां वाचने अर्थविवेचने च तात्पर्यम्। अक्षराणां लेखनज्ञानम्। केषांचन अक्षराणां सामान्यपरिचयः।

**पठनप्रवर्तनानि/पठनतन्त्राणि**

1. शाकानां नामपरिचायनम्।
   (वस्तूनि/चित्राणि उपयुज्य)
2. सम्भाषणगीतस्य नाटकरूपेण अवतारणम्।
3. शाकानां नामस्मरणक्रीडा।
4. अक्षरेण पदपूरणम्।
5. पदेन सह चित्रयोजनम्।

**पठनाधिगमाः**

सम्भाषणगीतं साभिनयमवतारयति। शाकानां नामानि वदति। शाकानां नामानि स्मरति। पदानि वस्तूनि च विविच्य वदति।

**प्रवर्तनम् 1**

**उद्देश्यम् - शाकानां परिचायनम्।**

**प्रक्रिया**

कारवेल्लम् , रक्तफलम्, गृञ्जनकम्, सूरणः, आलुकम्, अलाबुः, शिग्रुः इत्यादीनां शाकानां चित्रम् अथवा साक्षाद् वस्तूनि प्रदर्श्य वा एतत् किम् इति अध्यापकः छात्रान् पृच्छतु। एतत् कारवेल्लम् इत्यादिरूपेण शाकानां परिचायनं करोतु। दशतः अधिकानां शाकानां परिचायनम् एकस्मिन् अवसरे मास्तु। ततः छात्राः चित्राणि उपयुज्य परस्परं प्रश्नोत्तररूपेण अभ्यासं कुर्वन्तु।

**प्रवर्तनम् 2**

**उद्देश्यम् - नाटकावतारणं, गीतालपनम्।**

**प्रक्रिया** :-

एतत् प्रवर्तयितुम् अध्यापकः नाटकमाध्यमस्य साहाय्यं स्वीकरोतु। अध्यापकः छात्रान् एवं पृच्छतु। "छात्राः नाटकं दृष्टवन्तः वा? नाटकम् इष्टम् वा? नाटके अभिनेतुम् तात्पर्यं वा? (एकैकस्यापि प्रश्नस्य अन्ते उत्तरं वक्तुं छात्रेभ्यः अवसरः देयः।) तर्हि, वयमेकं नाटकं कुर्मः।"

"अस्माकं नाटके एका माता, तस्याः एका पुत्री, भेण्डम्, अलाबुः, हरितमरीचम्, रक्तफलम्, वृन्दाकम्, कारवेल्लं च कथापात्राणि। अनिला माता भवतु, उषा पुत्री भवतु, सुमेषः भेण्डम् भवतु..." इत्यादिरूपेण अध्यापकः कथापात्ररूपेण छात्रान् निश्चिनोतु। ततः अध्यापकः मातृभाषामवलम्ब्य नाटकस्य सन्दर्भं विशदयति। यथा - "कश्चन विरामदिवसः। उषा समीपगृहे मित्रैः सह क्रीडति। क्रीडानन्तरं श्रान्ता भूत्वा सा स्वगृहमागच्छति च।" नाटकावतरणं यथा :-

उषा - अम्ब, बुभुक्षा अस्ति।

माता - वत्से, भोजनं न सिद्धम्।

उषा - अम्ब! व्यञ्जनं किम्?

माता - क्वथितं निर्मातव्यम्। (कण्डोलं सूचयित्वा)
कण्डोले के के शाकाः सन्ति? पश्यतु।
(उषा कण्डोलस्य समीपं गच्छति। तदा कण्डोलात् मां स्वीकरोतु, मां स्वीकरोतु इति बहूनां शब्दं शृणोति)

उषा - (कण्डोलं दृष्ट्वा) भवन्तः के?

प्रथमः - (कण्डोलात् उत्प्लुत्य) उन्नतशीर्षं भेण्डमहम्।
(भेण्डादीनां शाकानां तत्तदनुरूपः वेषः दातव्यः।)

द्वितीयः - (आत्मानं प्रदर्श्य) वर्तुलगात्रश्चालाबुः।

तृतीयः - (आत्मानं स्पृष्ट्वा) हरितमरीचं कटुपूर्णम्।

चतुर्थः - (सहर्षम्) रक्तफलं हा बहुरुचिरम्।

पञ्चमः - (आत्मानं स्पृष्ट्वा) वृन्दाकमहं रसभरितम्।

षष्ठः - (आत्मानं प्रदर्श्य) कारवेल्लं बहुतिक्तम्।

तालात्मकरीत्या गीतरूपेण पुनरेकवारं शाकाः स्वपरिचायनं कुर्वन्तु। उषां परितः प्रदक्षिणरूपेण भ्रमणं कृत्वा वदति चेत् उत्तमम्। उषा समीपस्थयोः द्वयोः शाकयोः स्कन्धयोः उपरि हस्ते स्थापयति। तदा अवशिष्टाः शाकाः उभयोः पार्श्वयोः तैः साकं आत्मानः योजयन्ति। ते तथा मातुः समीपं गच्छन्ति।

उषा - अम्ब, एतान् स्वीकरोतु।

शाकाः - (मिलित्वा) अम्ब, अस्मान् स्वीकरोतु।

माता - क्वथिते सर्वान् योजयामि। सन्तुष्टाः वा?

शाकाः - आम्, सन्तुष्टाः वयम्।

(उषां, मातरं च परिवृत्य उन्नतशीर्षं भेण्डमहम्... इति पुनः आलपन्ति नृत्यन्ति च।)

**श्रद्धेयाः अंशाः**

1. सम्भाषणस्य उच्चारणम्।
2. उचिताः भावाः।
3. भागभागित्वम्।

**प्रवर्तनम् 3**

**उद्देश्यम् - शाकानां नामस्मरणम्।**

**प्रक्रिया :-**

अध्यापकः एकैकस्यापि छात्रस्य कृते शाकानां नामस्मरणाय, कथनाय च अवसरं ददातु। कः अधिकं वदति, सः विजयी। सः अभिनन्दनीयः।

**प्रवर्तनम् 4**

**उद्देश्यम् - बिन्दून् योजयित्वा शाकादीनां नामानि वदतु, लिखतु।**

**प्रक्रिया :-**

अध्यापकः चार्ट्पत्रे भेण्डस्य, मरीचस्य रक्तफलस्य च चित्राणि एकस्मिन् पार्श्वे, एकस्य अधः अपरम् इति क्रमेण संश्लेषयतु। चित्राणां पार्श्वे तेषां नामानि भेण्डम्, मरीचम्, रक्तफलम् इत्येवं रीत्या लिखतु। एतादृशरीत्या सज्जीकृत्य नयतु।

शाकानां चित्राणि एकैकं दृष्ट्वा तेषां नामानि छात्रैः वक्तव्यानि। तदनु एकं छात्रमुत्थाप्य भेण्डस्य चित्रं प्रदर्श्य एतत् किमिति पृच्छतु। तदा छात्रः भेण्डमिति वदेत्। तदा अध्यापकः भेण्डमित्यस्य प्रथमाक्षरम् उच्चार्य बिन्दून् योजयित्वा 'भे' इति लिखति। पूर्णं पदं पठति च। तदनन्तरं पाठपुस्तके भेण्डम् इति पदे बिन्दून् योजयित्वा भे इति लिखन्तु छात्राः। एवम् म, फ इति अक्षरयोः लेखनं कथमिति बोधयतु। ततः तल्लेखनाय छात्रान् निर्दिशतु। लेखनावसरे अपेक्षितं साहाय्यम् अध्यापकेन देयम्।

तदनन्तरं पवर्गाक्षराणां पाठनाय पनसम्, फलम्, बकः, भवनम्, मकरः इत्येतानि पदानि चित्रप्रदर्शनेन अर्थं ज्ञापयित्वा लिखित्वा वा प्रदर्शयतु उच्चरतु च। पुनः पदानि वाचयतु। ततः लेखनाय निर्दिशतु।

**प्रवर्तनम् 5**

**उद्देश्यम् - चित्राणां पदेन सह योजनम्।**

**प्रक्रिया :-**

अध्यापकः शाकानां नामसिहतं चार्ट्पत्रं, एकस्मिन् पार्श्वे संश्लेषकसहितानि (पृष्टतः) शाकचित्राणि च कक्ष्यायां नयतु। चित्राणि पृथक् पृथक् भवेयुः। नामधेयस्य पार्श्वे संश्लेषयितुं योग्यानि च भवेयुः। चार्ट्पत्रं फलके स्थापयित्वा एकं चित्रं स्वीकृत्य एतत् किम् इति पृच्छतु। उत्तरम् उक्तवान् छात्रः अध्यापकात् उचितं चित्रं स्वीकृत्य नामधेयस्य पार्श्वे संश्लेषयतु। एवं सर्वेषां चित्राणां संश्लेषणानन्तरं पाठपुस्तकस्थचित्राणां पदैः सह योजनाय निर्दिशतु।

## चतुर्थः पाठः

# विद्यालयः

**आमुखम्**

विद्यालयः न कवलं विद्यानाम् आलयः, किन्तु सहजीवनस्य, सौहार्दस्य, क्रीडायाः च आलयः एव। पूर्वकालापेक्षया विद्यालयेषु पाठ्य-पाठ्येतरप्रवर्तनानि उद्दिश्य अनेके सङ्केताः प्रचाल्यन्ते। तथा कृषिः, तदुत्पन्नानां विपणनं, करकौशलवस्तूनां निर्माणं, समाजसेवनमुद्दिश्य अवसराः च बहुत्र बहुधा लभन्ते। क्रीडोपकरणानि, मनोहराणि उद्यानानि, अत्याधुनिकरीत्या सज्जीकृताः कक्ष्याः च विद्यालयमागन्तुं छात्रान् प्रेरयन्ति। एतादृशस्य विद्यालयस्य वर्णने सर्वदा छात्राः उत्सुकाः च। अनेन गीतेन तेषां सुपरिचितस्य विद्यालयस्य अनुभवः, संस्कृतभाषाद्वारा स्मर्तुम् अवसरः लभ्यते। तथा नित्यपरिचितानां पदानां संस्कृतपदानि प्रत्यभिजानन्ति।

**उद्देश्यानि** - संस्कृतगीतपठनम्।

**कालांशः** - **18**

**आशयाः/ धारणाः/ व्यवहाररूपाणि।**

1. बालकविता।
2. विद्यालयपरिचयः।
3. कवितलापने उचितः तालः स्वीकरणीयः।
4. अक्षराणां परिचयः, पदानाम् उच्चारणम्। सुपरिचितानां विद्यालयसंबन्द्धपदानां संस्कृतपदानि जानाति।

**पठनप्रवर्तनानि/पठनतन्त्राणि**

1. कवितालपनम्।
2. विद्यालयनिरीक्षणम्, अवगमनम्।
3. संस्कृतपदानां परिचयः।
4. चित्ररचना।
5. अक्षररचना।
6. चार्ट्पत्रे विद्यालयस्य चित्रणम्

**पठनाधिगमाः**

1. बालकवितां सतालमालपति।
2. कवितान्तर्गतानि पदानि विविच्य लिखति।
3. अक्षराणि पदानि च लिखति।
4. कवितायाः आशयं मातृभाषया वदति लिखति च।

**प्रवर्तनम् 1**

**उद्देश्यम् - सतालं गीतालपनम्।**

**प्रक्रिया**

अध्यापकः कक्ष्यां प्रविश्य छात्रैः निर्मितस्य उद्यानस्य विशेषताः अनुभवान् च पृच्छति।

कानि कानि पुष्पाणि सन्ति? तेषां नामानि वदन्तु। छात्राः कैरल्यां वदन्ति।

अनेन उद्यानेन अस्माकं विद्यालयः अतिमनोहरः संजातः। पुनः विद्यालयमधिकृत्य प्रश्नान् पृच्छतु। छात्रैः कैरल्यां दत्तानां पदानां संस्कृतपदानि परिचाययति च। पाठपुस्तके दत्तं विद्यालयगीतं अस्माकं विद्यालयमुद्दिश्य रचितं वा?

अनन्तरं गीतम् उच्चैः सतालम् अध्यापकः गायति। गीतस्थानि पदानि परिचाययति।

विविधैः स्वरैः तालैः च आलपति। छात्राः एकैकशः पठन्तु। प्रतिपादमपि ते अनुगायन्तु। सङ्घरूपेण गायन्तु च।

मूल्यनिर्णय सूचिकाः -
- उचितः तालः स्वीकृतः
- उचारणे अक्षरस्फुटता पालिता
- उचितस्थाने यतिः

**प्रवर्तनम् - 2**

**उद्देश्यम् - पदावलीपरिचयः, अर्थावबोधनम्।**

**प्रक्रिया : -**

अध्यापकः 'विद्या मे निलयं पश्यतु' इति पङ्क्तेः अर्थं छात्रान् बोधयति। कीदृशं निलयम्? इति पृष्ट्वा उत्तरकथनाय तान् प्रेरयति। पर्याप्तं साहाय्यं करोति च। उपवनं, गुरुजनं, ज्ञानं, स्नेहपवित्रं इत्यादीनां पदानाम् अर्थं विशदयति । नवीनपदानि परिचाययति। अपि च ज्ञानं, गुरुः, विद्या, स्नेहं इत्यादीनि पदानि संस्कृतपदानि इति छात्राः अवगच्छन्ति।

**मूल्यनिर्णयसूचिकाः** - अर्थावबोधः। पदपरिचयः। आशयग्रहणम्।

**प्रवर्तनम् - 3 - चित्रं वर्णैः लिम्पतु।**

**उद्देश्यम् - वर्णलेपने तात्पर्यम्।**

**प्रक्रिया : -**

पुस्तकस्थं चित्रं प्रदर्श्य अध्यापकः उचितवर्णैः चित्रं लिम्पतु इति निर्दिशति । छात्रा उत्साहेन कुर्वन्ति च। येन छात्रेण सुष्ठु रीत्या वर्णैः चित्रलेपनं कृतं तं छात्रमभिनन्दतु।

मूल्यनिर्णय सूचिकाः -
- उचित वर्ण स्वीकारः।
- वर्णलेपने कृत्यता।
- आकर्षकत्वम्।

**प्रवर्तनम् - 4**

**उद्देश्यम् - अक्षरावबोधः।**

**प्रक्रिया :-**

छात्राः ! यूयं केन मार्गेण विद्यालयम् आगच्छथ ? इति अध्यापकः पृच्छति, छात्राः तेषां मार्गान् वदन्ति। अध्यापकः पाठपुस्तकस्थं चित्रं प्रदर्श्य, "पश्यतु बालिका कुत्र गच्छति ?" "विद्यालयं गच्छति" इति छात्राः वदन्ति। आम् अक्षरमार्गेण तां विद्यालयं नयतु। अध्यापकः श्यामफलके/चार्ट्पत्रे वा 'विद्यालयः' इति पदं प्रदर्शयति। तस्य साहाय्येन छात्राः मार्गं रेखया योजयन्ति।

**मूल्यनिर्णयसूचिकाः** - अक्षरग्रहणम्।
पदग्रहणम्।
रेखाङ्कनम्।

**प्रवर्तनम् - 5 - बिन्दून् योजयित्वा अक्षरलेखनम्।**

**उद्देश्यम् - अक्षरपरिचयः अक्षरलेखनं च।**

**प्रक्रिया :-**

छात्राः अध्यापकस्य निर्देशानुसारं बिन्दून् योजयित्वा पदं पूरयति। अक्षराणां लेखनक्रम् अध्यापकः एकवारं प्रदर्शयति। अनन्तरं रिक्तस्थानम् अक्षरेण पूरयति। छात्राः पदानि वाचयन्ति। पदानि तावत् निलयः, उपवनम् विद्यालयः।

**प्रवर्तनम् - 6 - य र ल व इत्यक्षराणां लेखनम्।**

**उद्देश्यम् - य र ल व इत्यक्षराणाम् अधिकपरिचयः।**

**प्रक्रिया :-**

अध्यापकः य र ल व इत्येतानि अक्षराणि अधिकतया वर्तमानानि कानिचित् पदानि चार्ट्पत्रे विलिख्य प्रदर्शयतु। तद्यथा :-

कायः, रविः, लीला, विद्या, आलयः, योग्यः, यः, या, यत्, यानि, रेखा, वनम् इत्यादि।

अध्यापकस्य वाचनानुसारं छात्राः पठन्तु। पुनः य र ल व इत्येतानां अक्षराणां यथावत् लेखनं, अक्षराणां लेखनक्रमं च फलके सश्रद्धम् अध्यापकः करोतु।

छात्राः सश्रद्धं पठन्तु, लेखनं परिशीलयन्तु च।

पञ्चमः पाठः

# काकःशरारिः च।

**आमुखम्**

परोपकारः सामूहिकजीवने अत्यन्तमपेक्षितः। स्वयं जीवनसम्पादनस्य अथवा स्वयंपर्याप्ततायाः महत्वप्रतिपादिकां कथां अस्मिन् पाठे समायोजिता।

**आशयः** - **स्वावलम्बः, परोपकारः , आत्माभिमानः।**

**उद्देश्यम्** - परोपकारः परस्परस्नेहः इत्यादीन् गुणान् अधिकृत्य बोधनम्। कथाकथनसामर्थ्यम्, कथावाचनतात्पर्यम्, उचितवर्णलेपनम्, चित्राणि दृष्ट्वा आशयस्य प्रत्यभिज्ञानम्, अक्षरज्ञानं च।

पठननैपुण्यानि - कथावाचनम्, कथां मातृभाषया वदति। कथान्तर्गतानां पदानाम् अर्थावगमनम्। आशयानुसारं चित्राणां क्रमीकरणम्। अक्षराणां प्रत्यभिज्ञानम्। कथाकथनसामर्थ्यम्, चित्राणि निरीक्ष्य विवेचनसामर्थ्यम्।

कालांशः - 17

साहायकग्रन्थः - पञ्चतन्त्रम्।

चित्राणि - कथान्र्तगतानि चित्राणि।

सी.ऐ.टी. साध्यता - मिट्टुमिट्टुक्कन् मलयालम् अनुप्राणिता।

**आशयाः/ धारणाः/ व्यवहाररूपाणि।**

कथा/स्वावलम्बिता, परोपकारः, आत्माभिमानः, वाचनम् चित्रक्रमीकरणम्, अभिनयः समानाशयकथाकथनम्। अक्षरज्ञानम्। लघुवाक्यानां कथनं वर्णलेपनम्।

**पठनप्रवर्तनानि/पठनतन्त्राणि**

कथायाः उच्चैः वाचनम्। कथाचित्राणां क्रमीकरणम्। चित्राणि निरीक्ष्य आशयावगमनम् अभनियः च। इतरकथाकथनम्। बिन्दूनां योजनेन श, ष, स, ह , ग, य, श्र इत्यादीनाम् अक्षराणां लेखनम्। उचितरीत्या उत्तरकथनं वर्णलेपनं च।

**पठनाधिगमाः**

कथां सस्वरं वाचयति। आशयानुसारं चित्राणि क्रमीकरोति। मातृभाषायां च साभिनयं कथयति च। इतरकथां वदति। अक्षराणि विवेचयति वदति लिखति च। उत्तराणि वदति, उचितयारीत्या चित्रे वर्णलेपनं करोति।

**कथायाः अवतारणम्**

अध्यापकः कक्ष्याम् आगत्य छात्रान् उद्दिश्य बहून् प्रश्नान् पृच्छति।

अयि भो छात्राः! भवन्तः कथाम् श्रोतुम् इच्छन्ति किम्?

छात्राः : आम्।

अध्याः : कीदृशीः कथाः इच्छन्ति?

छात्राः : मनुष्यपक्षिमृगादीनाम्। मनुष्यादीनाम् इत्यादिनि वदेयुः।

अध्याः : किमर्थं कथाः पठनीयाः?

छात्राः : ज्ञानवर्धनार्थम्। विनोदार्थम्।

अध्याः : छात्राः ! काश्चन कथाः उपदेशात्मिकाः, काश्चन कथाः विनोददायिकाः च भवन्ति। कथापठनेन उत्तमशीलार्जनं, सदाचारबोधः, कर्तव्याकर्तव्यविवेकः इत्यादीन् गुणान् सम्पादयामः। परिश्रमेण जीवनं वरम् इति आशयं ददाति एषा कथा। तादृशीनां भावनानाम् उत्पादनार्थम् एतां कथां पठामः।

**प्रवर्तनम् 1**

**उद्देश्यम् - पाठभागस्यानुवाचनम्।**

**प्रक्रिया** :-

अध्यापकः पाठभागकथां साभिनयं कक्ष्यायाम् अवतारयतु। आशयविशदीकरणमपि ददातु। श्रवणानन्तरम् अध्यापकसाहाय्येन मातृभाषया कथनाय छात्रान् प्रेरयतु। पश्चात् अध्यापकः पाठभागे दत्तम् एकैकमपि वाक्यं द्विवारम् उच्चैः स्पष्टतया च वाचयति। अनन्तरं छात्रान् अनुवाचनाय प्रेरयति।

**मूल्यर्निणयसूचिकाः** - स्पष्टतया अनुवाचनम्।
अक्षराणां प्रत्यभिज्ञानम्। आशयावगतिः।

**प्रवर्तनम् 2 - कथाचित्रक्रमीकरणम्।**

**उद्देश्यम् - कथाचित्राणाम् आशयावगमनम्। चित्रकथानां पठने तात्पर्यम्।**

**प्रक्रिया :-**

अध्यापकः पूर्वसज्जीकृतैः चित्रैः सह कक्ष्याम् आगत्य छात्रान् सङ्घान् करोतु। पाठभागस्थाः कथाः क्रमरहितरूपेण एकैकस्मै संघाय ददातु। कथायाः आशयानुसारं क्रमीकरोतु इति वदतु। चित्राणि निरीक्ष्य आशयकथनाय प्रेरयतु। आवश्यकं साहाय्यमपि करोतु।

**मूल्यनिर्णयसूचिके** - उचितं क्रमीकरणम्।
आशयावगमः।

**प्रवर्तनम् 3 - प्रश्नानाम् उत्तरकथनम् वर्णलेपनं च।**

**उद्देश्यम् - कथाज्ञानं निरीक्षणपाटवं च। वर्णलेपनम्।**

**प्रक्रिया** :-

आशयानुसारं चित्रं प्रदर्श्य अध्यापकः पठनप्रवर्तने वर्तमानौ प्रश्नौ पृच्छति। छात्राः उत्तरं वदन्ति। अध्यापकः प्रश्नयोः उत्तरं फलके लिखति। अध्यापकेन लिखितं वाक्यं छात्राः ज्ञात्वा उच्चैः पठन्ति च।

कः रोगबाधितः भवति?

काकः।

कः मीनं गृह्णाति?

शरारिः।

पुनः अध्यापकः अष्टविंशतितमे पुटे वर्तमाने पदे रेखया योजयतु। अनन्तरं एकोन विशंतितमे पुटे वर्तमानं चित्रं वर्णैः लिम्पतु इति निर्दिशतु। छात्राः वर्णलेपनं कुर्वन्ति। अथ उत्तमं चित्रम् अध्यापकः कक्ष्यायां प्रदर्श्य अनुमोदयति । मूल्यनिर्णयमपि करोति।

**मूल्यर्निणयसूचिकाः** आशयज्ञानम्।
उचितवर्णलेपनम्।
आकर्षणीयता।

**प्रवर्तनम् 4 - अक्षरलेखनेन पदपूरणम्।**

**उद्देश्यम् - अक्षरविवेचनज्ञानम्**

**प्रक्रिया** :-

अध्यापकः पठनप्रवर्तने दत्तं पदद्वयं पाठभागे कुत्र आगच्छति इति अन्वेषणाय छात्रान् प्रेरयति। छात्राः सङ्घे उपविश्य तस्य अन्वेषणं कुर्वन्तु। छात्राः पाठभागं दृष्टवा उचितम् अक्षरम् प्रत्यभिज्ञाय चिनोति वदति लिखति च। उत्तरं तु परिश्रमः, याचते च ।

**मूल्यनिर्णयसूचिकाः** - उचितरूपेण पदचयनम्। अक्षरयोः चयनम्। उचितलेखनम्।

**प्रवर्तनम् 5 - श, ष, स, ह, ग, य, इत्यादीनां वर्णानां लेखनम्।**

**उद्देश्यम् - अक्षरज्ञानम्।**

**प्रक्रिया :-**

अध्यापकः कक्ष्याम् आगत्य बहूनि पदानि फलके लिखति। श, ष, स, ह, ग, य इत्यादीन् वर्णान् बिन्दूरूपेण लिखति।

पुनः तेषाम् अक्षराणां परिचयनाय अधो निर्दिष्टानि पदानि चार्ट्पत्रे विलिख्य प्रदर्शयतु।

शशः, शशी, शलभः, देशः, दश, शुभं, शुकः, शुनकः, षट्, मेषः, पुरुषः, वर्षा, संगीतम्, हरिः, हरः, हंसः, सिंहः, गुहा, गजः, गरुडः, यशः, यात्रा, यमुना, यः।

अध्यापकः एकैकं पदं द्विवारम् उच्चैः वाचयति। श, ष, स, ह, ग, य इत्यादीनि अक्षराणि स्पष्टतया वाचयति।

**मूल्यनिर्णयसूचिकाः** उचितलेखनम्।
सुन्दरता।
अक्षरपरिचयः।

**प्रवर्तनं 6 - साभिनयकथनम्।**

**उद्देश्यम् - अभिनयचातुर्यवर्धनम्।**

**प्रक्रिया :-**

अध्यापकः कक्ष्याम् आगत्य छात्रान् सङ्घं करोतु। एकः सङ्घः काकस्य, अपरः शरारेः च भागं गृह्णातु इति वदतु।

एतां कथां मातृभाषायां परिवर्तयतु इति वदतु ! ताम् कथाम् अधिकृत्य आशयानुसारं संभाषणरचनां कुर्वन्तु इति वदतु। छात्राः सङ्घे चर्चां कृत्वा संभाषणरूपेण साभिनयं कथां कथयन्ति। सङ्घे पर्माप्तां चर्चां कृत्वा संघशः आगत्य कक्ष्यायाम् अवतारयतु। उत्तमाय संघाय अथवा उत्तमरीत्या अभिनयं कृतवते अनुमोदनं ददातु।

**मूल्यनिर्णयसूचिकाः** - अवतारणशैली।
उच्चारणस्फुटता।
भागभागित्वम्।

**प्रवर्तनम् 7 - परिचितकथावतारणम्।**

**उद्देश्यम् - इतरकथाज्ञानम्।**

**प्रक्रिया** :-

अध्यापकः कक्ष्याम् आगत्य वदतु 'भवन्तः एतां कथां पठितवन्तः ज्ञातवन्तः किल। एतादृश्य कथाः भवन्तः जानन्ति वा? कैरल्यामपि अनेकाः कथाः सन्ति किल। ताः कथाः वर्गे अवतारणार्थम् अवसरं ददातु। अध्यापकः आदर्शरूपेण एकां कथां वर्गे अवतारयतु।

**मूल्यनिर्णयसूचिके** - अवतारणचातुरी।
सभाकम्पं विना अवतारणम्।

NB (पञ्चतन्त्रकथातः उचितां कामपि कथाम् अथवा संस्कृतमासपत्रिकेभ्यः उचितां लेघुकथां वा अध्यापकः अवतारयतु)

षष्ठः पाठः

# संख्याक्रीडा

**आमुखम्**

संख्याज्ञानं सर्वेषां मानवानां कृते अत्यन्तम् आवश्यकम्। गणितशास्त्रस्य आधारशिला भवति संख्या। भारतीयाः एव शून्यमिति एककस्य प्रथमा दृष्टारः। दशपर्यन्तं संख्याः प्रथमकक्ष्यायां छात्रैः पठिताः। अस्मिन् पाठे पञ्चदशपर्यन्तं संख्याः दत्ताः। संख्यापठनं क्रीडाद्वारा रसकरं भवति। पाठपुस्तके दत्तां क्रीडां अध्यापकः छात्राः च मिलित्वा क्रीडन्तु। पाठाऽयं सम्भाषण रूपेण भवति।

**कालांशः** - 15

**उद्देश्यम्** - सम्भाषणपरिचायनम्।
संख्याज्ञानम्।

**नैपुणी** - सम्भाषणं कर्तुं परिचिनोति। संख्यां 1तः 15 पर्यन्तं वदति।
संख्याचिह्नानि जानाति, लिखति च।

**आशयाः/ धारणाः/ व्यवहाररूपाणि।**

सम्भाषणम्।
1 तः15 पर्यन्तं संख्याज्ञानम्।
प्रश्नवाचकशब्दः (कति?)
संख्याकथनम्।
लघुवाक्यानि।

**पठनप्रवर्तनानि/पठनतन्त्राणि**

सङ्ख्यागीतालपनम्।
1 तः 10 संख्याकथनम्।
वस्तूनि उपयुज्य संख्यागणनक्रीडा ।
ऊहक्रीडा (अनुमानक्रीडा)।
दिनदर्शिकायां संख्याप्रदर्शनक्रीडा 1तः 15 पर्यन्तम्।
प्रश्नोत्तराणि।
संख्याः योजयित्वा चित्ररचना वर्णलेपनं च।
संख्यालेखनम्।

**पठनाधिगमाः**

संख्यागीतमालपति।
1 तः 10 पर्यन्तं संख्यां वदति।
कति उपयुज्य प्रश्नं निर्माति!
संख्यां अनुमीय वदति।
संख्यां (1तः 15) प्रत्यभिजानन्ति प्रदर्शयति च।
उत्तरं लघुवाक्यैः वदति।
संख्यां विवेचयति क्रमशः संख्यां वदति। वर्णैर्लिम्पति। संख्याशब्दान् अक्षरैः चिह्नैः च लिखति।

**प्रवर्तनम् 1**

**उद्देश्यम् - गीतालपनम्।**

**प्रक्रिया :-**

अध्यापकः "एकमिति वदाम एकीभूय तिष्ठामः" इति गीतमालपतु। छात्राः गीतम् अन्वालपन्तु। ततः छात्रसंध्याः गीतम् आलपन्नु। ततः पञ्चषाः छात्राः अपि गानम् आलपन्नु।

मूल्यनिर्णय सूचिकाः -
- स्फुटोचारणम्
- उचितः अभिनयः
- उचितस्थानेषु यतिः।

**प्रवर्तनम् 2**

**उद्देश्यम् - संख्याप्रदर्शनक्रीडाः।**

**प्रक्रिया :-**

अध्यापकः संस्कृतदिनदर्शिकां कक्ष्यां आनयतु। अध्यापकः क्रीडानिर्देशान् ददातु। ततः छात्राणां गणद्वयं कृत्वा क्रीडामारब्धुम् अध्यापकः यां संख्यां वदति तदा प्रतिगणं एकः दिनदर्शिकायाः समीपमागत्य तां संख्यां अङ्गुल्या स्पृशतु। प्रथमं यः समीचीनां संख्यां स्पृशति सः गणः विजयी भवति। तस्मै गणाय एकं अङ्कं दातव्यः। एवं कः गणः विजयी इति घोषणां करोतु।

**प्रवर्तनम् 3**

**उद्देश्यम्- संख्याबिन्दून् योजयित्वा। चित्ररचना।**

**प्रक्रिया :-**

अध्यापकः पञ्चदशपर्यन्तां सख्यां श्यामफलके लिखतु ततः पञ्चषान् छात्रान् वाचनाय प्रेरयतु। ततः

अध्यापकः पाठपुस्तकस्थे द्वास्त्रिंशे पुटे संख्यानां यथाक्रमं योजनाय छात्रान् निर्दिशतु। छात्राः सश्रद्धं कुर्वन्तु। अथ अत्र निलीनं पक्षिणं विवेचयन्तु। पुनः वर्णैः लिम्पन्तु।

मूल्यनिर्णय सूचिकाः -
- संख्याः यथाक्रमं योजिताः
- पक्षिणः नाम कथनम्
- वर्णलेपनस्य आकर्षकत्वम्।

**प्रवर्तनम् 4**

**उद्देश्यम् - संख्या कथनम्।**

**प्रक्रिया :-**

अध्यापकः भिन्नभिन्नवस्तूनां चित्राणि चार्ट्पत्रे सज्जीकृत्य आनयतु। पंथम चित्रे एकं वस्तु, द्वितीये तु द्वयं इति क्रमेण दशपर्यन्तं पाठयितुं योग्यानि भवेयुः चित्राणि। एकेन छात्रेण एकस्मिन् चित्रे कति वस्तूनि सन्ति इति वक्तव्यम्। सर्वेषां कृते अवसरान् ददातु।

ततः छात्राः कामपि संख्यां टिप्पणी पुस्तके लिखन्तु। संख्यानुसारं उचितस्य वस्तुनः चित्रमपि सोजयन्तु। वर्गे अवतारयन्तु। अनुबन्धप्रवर्तनरूपेण प्रवर्तनमिदं दानु आकयते।

**प्रवर्तनम् 5**

**उद्देश्यम् - संख्यानुमानक्रीडा।**

**प्रक्रिया :-**

अध्यापकः लोपायाः भागं स्वीकरोतु। गोलिकाः हस्तयोः निगूह्य लोपा इव पृच्छतु - "मम हस्ते कति गोलिकाः सन्ति?" पाठरूपेण दत्तां संख्याक्रीडां अध्यापकः छात्राः च मिलित्वा क्रीडन्तु।

ततः छात्राः अपि लोपायाः भागं स्वीकृत्य संख्या केलिं कुर्वन्तु। वस्तुनः गणनां कृत्वा एव उत्तरं वक्तायम्। एतत् विभिभशेषियुक्तानां छात्राणामपि सोपकारकं भवात।

**प्रवर्तनम् 6**

**उद्देश्यम्- उत्तरकथनम् ।**

**प्रक्रिया :-**

अध्यापकः पाठपुस्तकस्थं चित्रं प्रदर्श्य "चित्रे कति छात्राः सन्ति? "इत्यादीन् प्रश्नान् पृच्छतु। छात्राः चित्रं दृष्टवा उत्तरं वदन्तु। कोष्ठके उत्तरं लिखन्तु च।

उत्तराणि तु यथाक्रमं पञ्च, अष्टौ, चत्वारः।

**प्रवर्तनम् 7**

**उद्देश्यम् - संख्यां पठित्वा पूरणम्।**

**प्रक्रिया :-**

पाठपुस्तके दत्ताः संख्याः दृष्ट्वा उच्चैः पठतु अध्यापकः। पुनः छात्राः अपि पठन्तु। आवश्यकम् चेत् अध्यापकः लिखित्वा प्रदर्शयतु। ततः छात्राः स्वपुस्तकेषु लिखन्तु।

छात्रसङ्घाः पञ्चदशपर्यन्तं संख्याः वस्तुनः/चित्राणां वा योजनं कृत्वा चाट्पत्रे विलिख्य वर्गे प्रदर्शयन्तु। वर्गे दश, ततोप्यधिकतया वर्तमानानि वस्तूनि विवेचयतु। गणना कृत्वा संख्यां च वदतु।

सप्तमः पाठः

# जननी जन्मभूमिश्च

**आमुखम्**

जननकारणत्वात् जननीं सर्वे बहुमानयन्ति। अस्माकं जननं यस्यां भूमौ भवति सा अस्माकं जन्मभूमिः। जननी इव जन्मभूमिः अपि अस्माभिः माननीया।

जननी अस्मान् जननादारभ्य परिपालयति। निरन्तरं स्निह्यति। यथासमयं भक्षणं ददाति। अस्माकं दुःखानि दूरीकरोति। अस्माकं श्रेयसे सर्वाणि साहाय्यानि ददाति। अस्माकं स्नेहस्य प्रथमपात्रं भवति जननी।

जन्मभूमिः अपि भक्षणवस्त्रादीनां प्रदानेन, स्वस्थ-जीवनप्रदानेन च अस्मान् वात्सल्यपूर्वं संरक्षति। एवं जननीं जन्मभूमिं च बहुमानपूर्वं चिन्तयामः।

एकम् ऐतिह्यम् अस्ति। युद्धे रावणं हत्वा अनुयायिभिः सह अयोध्यां प्रत्यागन्तुं चिन्तयति रामः। तदवसरे लक्ष्मणः वदति - ज्येष्ठ, इयं लङ्का ऐश्वर्यपूर्णा भवति। लङ्कां किमर्थं विहाय अयोध्यां गमिष्यामः? तदा रामः वदति -

"अपि स्वर्णमयी लङ्का
न मे लक्ष्मण रोचते।
जननी जन्मभूमिश्च
स्वर्गादपि गरीयसी।।" इति।

अस्माकं जन्मदेशः भारतम्। पुरा भरतेन पालितम् इति कारणेन भारतम् इति नाम लब्धम् इति कथ्यते। भारते विविधधर्मावलम्बिनः, विविधभाषाभाषिणः, विविधवर्णयुक्ताः च जनाः साहोदर्येण वसन्ति।

वयं जननीं जन्मभूमिं च आदरपूर्वं पश्यामः।

**कालांशः** - 11

**उद्देश्यानि** - राज्यस्नेहस्य उद्दीपनम्। वर्णधर्मभाषादीनां परिगणनां विना साहोदर्यस्य अवबोधः। अक्षरणां परिचयः।

**आशयाः/ धारणाः/ व्यवहाररूपाणि।**

भारतस्य केषाञ्चन राज्यानां भाषाणां च परिचयः।
जननी बहुमान्या भवति। जन्मभूमिः च तथा।
स्वर्गः भावनानुसारं सर्वसुखसम्पूर्णं देशं भवति।
जननी जन्मभूमिश्च ततोप्याधिकं गरीयसी, सुखदायिनी च भवति। विवरणात्मकः पाठः।

**पठनप्रवर्तनानि/पठनतन्त्राणि**

उचिताक्षरं दोजयित्वा पदलेखनम्।
चर्चा।
तवर्गाक्षरसहितानां पदानां विवेचनम्।
अवतरणं च।
आप्तवाक्यानां चयनम् ।

**पठनाधिगमाः**

राज्यानां भाषाणां च नामानि परिचिनोति।
अक्षरपरिचयः
अक्षरस्फुटतया वाचनम्
आप्तवाक्यानि परिचिनोति।

**प्रवर्तनम् -1**

**उद्देश्यम् - पाठवाचनम्।**

**प्रक्रिया**

अध्यापकः पृच्छति - अस्माकं राष्ट्रस्य नाम किम्? इन्ड्या इति वदन्ति छात्राः। अपरं नाम जानन्ति वा? आम्, भारतम्। भारतम् इति नाम कथं आविर्भूतम् इति जानन्ति वा? श्रुण्वन्तु। पुरा भरतः नाम राजा इमं देशं पर्यपालयत्। तस्मात् भारतम् इति नाम संजातम् इति श्रूयते। भवताम् इष्टतमः देशः कः? भारतम् इति छात्राः वदन्ति। एषः पाठः भारतम् अधिकृत्यैव भवति। अहं वाचयामि, इत्युक्त्वा अध्यापकः पाठभागम् अक्षरस्फुटतया उचितभावेन द्विराम् च वाचयति। ततः संघरूपीकरणं कृत्वा अनुवाचनाय प्रेरयति। एकैकः सङ्घः अनुवाचयति। अध्यापकः स्खालित्यनिवारणं करोति। ततः एकैकः छात्रः पाठभागं वाचयति। उत्तमरीत्या ये वाचयन्ति ते प्रशंसार्हाः।

**मूल्यनिर्णयसूचिकाः -** अक्षरस्फुटता, उचितभावः, उचितस्थानेषु यतिः।

**प्रवर्तनम् 2**

**उद्देश्यम् - भारतस्य राज्यानां भाषाणां च परिचयः।**

**प्रक्रिया :-**

अध्यापकः भारतस्य रूपरेखां चार्ट्पत्रे प्रदर्शयति। तस्यां राज्यनामानि तेषां भाषाः च संस्कृतेन लिखितानि भवेयुः। अत्र श्रद्धा करणीया अध्यापकेन। ततः अध्यापकः एकैकं राज्यं प्रदर्श्य तस्य नामकथनाय भाषाणां कथनाय च प्रेरयति। केरलम् इति राज्यम्। तस्य भाषा मलयालम्। तिमिलनाटु इति राज्यम् । तस्य भाषा तमिल्। एवं क्रमेण। तदनन्तरम् अध्यापकः वदति।

| |
|---|
| अस्माकं देशः भवति भारतम्। भारते विविधाः भाषाः सन्ति। विविधाः संस्कृतयः सन्ति। विविधाः धर्माः चसन्ति। किन्तु वयं सर्वे सोदराः। |

**प्रवर्तनम् 3**

**उद्देश्यम् - बिन्दून् योजयित्वा अक्षरलेखनम्।**

**प्रक्रिया :-**

अध्यापकः पाठपुस्तके षट्त्रिंशत्तमे पुटे विद्यमानानां प्रवर्तनानां चालनाया छात्रान् निर्दिशति। बिन्दून् योजयित्वा अक्षरलेखनं तेभ्यः परिचितमेव। छात्राः बिन्दून् योजयित्वा अक्षराणि लिखन्ति। तदनन्तरम् एकैकः टिप्पणिपुस्तके तानि अक्षराणि लिखति।

**मूल्यनिर्णयसूचिका-** उचितया रीत्या अक्षरलेखनम्।

**प्रवर्तनम् 4**

**उद्देश्यम् - प्रतिज्ञावाचनम्।**

**प्रक्रिया :-**

पाठपुस्तके प्रतिज्ञा दत्ता अस्ति। "भारतम् मम राष्ट्रम्....। ताम् अक्षरस्फुटतया उचितभावेन च अध्यापकः कक्ष्यायाम् एकवारं वाचयतु। तदनन्तरं प्रतिज्ञावाक्यानि खण्डशः वाचयित्वा अनुवाचनाय तान् प्रेरयति। छात्राः तथा कुर्वन्ति। पुनः छात्रान् सङ्घान् करोतु। एकैकः सङ्घः इति क्रमेण छात्राः अध्यापकस्य वाचनानन्तरम् वाचनं कुर्वन्तु। विद्यालयसभासु संस्कृतप्रतिज्ञावाचनं करणीयम्। तदा छात्राः प्रतिज्ञां श्रोतुं वक्तुं च अवसरान् लभन्ते। कैरल्यां प्रतिज्ञा परिचिता इत्यनेन छात्राः संस्कृतप्रतिज्ञायाः आशयं ग्रहीतुं समर्थाः भवन्ति।

**मूल्यनिर्णयसूचिकाः** - अक्षरस्फुटता, उचितभावः आशयावगतिः।

**प्रवर्तनम् 5**

**उद्देश्यम् - जननी जन्मभूमिश्च स्वर्गादपि गरीयसी इति विषये चर्चा।**

**प्रक्रिया :-**

अध्यापकः छात्रान् समीप्य पृच्छति - "तव अम्बाया नाम किम्? एकैकः छात्रः उत्तरं ददाति। ततः एकैकं छात्रं उपगम्य "तव जन्मभूम्याः नाम किम्" इति पृच्छति। एकैकः 'भारतम्' इति वदति। ततः 'जननी' इत्यस्य अर्थः 'अम्बा' एव इति छात्रान्

अवबोधयति। एकैकः चिन्तयतु - 'जननी तुभ्यं किं किं करोति? उत्तरं जानन्ति चेत् उत्थाय वदन्तु" तदा एकः उत्थाय "भोजनं ददाति" इति वदति। द्वितीयः 'स्नापयति' इति वदति। तृतीयः 'लालयति' इति वदति। तथा च अन्यानि उत्तराणि वदन्ति छात्राः। एवं चेत् युष्माकं जीवने जनन्याः प्राधान्यम् अस्ति वा? इति अध्यापकः पृच्छति। आम् इति छात्राः वदन्ति। 'अम्बा सततं लालयति' इति गीतं अनुस्मारयति।

अनन्तरं जन्मभूमिः तव कृते किं किं करोति इति अध्यापकः एकं छात्रं पृच्छति। न किमपि इति सः वदति। अध्यापकः पृच्छति - 'कः अस्ति यत्किमपि इति उत्तरेण?'। न कोऽपि उत्तिष्ठति। अध्यापकः वदति - "माता शिशून् संरक्षति इति जानन्ति वा?" आम् इति छात्राः वदन्ति। एवमेव अस्माकं जन्मभूमिः शत्रुभ्यः अस्मान् परिपालयति। यथासमयं वयं भक्षणं लभामहे। रोगबाधिताः चिकित्सां लभन्ते। एवं चिन्तयति चेत् जन्मभूमि; अपि मातृतुल्या।" अत्र यूयं किं चिन्तयथ?" छात्रेषु केचन वदन्ति जननी जन्मभूमिः च तुल्ये। केचन वदन्ति - 'अस्माकं जीवने तयोः अतीव प्राधान्यम् अस्ति इति।

**मूल्यनिर्णयसूचिके** - सुन्दर्भानुसारि प्रतिकरणम्, आशयव्यक्तता।

**प्रवर्तनम् 6**

**उद्देश्यम्** - **अक्षरलेखनम्।**

**प्रक्रिया :-**

अध्यापकः चार्ट्पत्रे त, थ, द, ध, न इति अक्षराणि स्थूलरूपेण विलिख्य प्रदर्शयति। चार्ट्पत्रस्य अधोभागे माता, तातः, रथः, दशरथः, कथा, दीपः, दिवाकरः, धनम्, धीवरः, नयनम्, नदी इत्यादीनि पदानि लिखितानि भवेयुः। अत्र तवर्गाक्षराणि प्रत्येकवर्णेन लिखितानि भवेयुः। अनन्तरं सङ्गणकयन्त्रमुपयुज्य अनुप्राणितचित्ररूपेण तवर्गाक्षराणां लेखनक्रमं प्रदर्शयतु अध्यापकः। तदनन्तरं छात्राणां टिप्पणिपुस्तकेषु रक्तवर्णेन तवर्गाक्षराणि लिखतु। छात्राः लिखन्तु च।

**मूल्यनिर्णयसूचिका** - उचितरीत्या अक्षरलेखनम्।

**प्रवर्तनम् 7** :-

**उद्देश्यम्** - **आप्तवाक्यानां चयनम्।**

**प्रक्रिया**

अध्यापकः एकरूप्यकस्य मूल्यपत्रस्य (currency note) आनयनाय छात्रान् प्राक्तनदिने एव निर्दिशति स्म। तदनुसारम् एकैकः छात्रः तदानीतवान्। अध्यापकः वदति। नाणकं पश्यतु। तस्मिन् किं किं लिखितम् इति पश्यतु। छात्राः यथाशक्यं वाचयति 'एकम्' इत्यादीनि। 'भारतम्' इति दृष्टं खलु। अशोकस्तम्भः दृष्टः खलु। आम् इति छात्राः वदन्ति। अशोकस्तम्भस्य अधः किं लिखितम्? छात्राः वाचनाय न शक्ताः। तदा अध्यापकः वाचनं करोति - "सत्यमेव जयते"। एतत् भारतसर्वकारस्य ध्येयवाक्यम् (आप्तवाक्यं) भवति। संस्कृते एतादृशानि बहूनि आप्तवाक्यानि सन्ति। तदनन्तरम् अध्यापकः तत्सम्बन्धीनि कर्गदखण्डानि तेभ्यः ददाति। आप्तवाक्यचयनाय प्रेरयति च।

**मूल्यनिर्णयसूचिकाः** - अक्षराणां प्रत्यभिज्ञानम्। आप्तवाक्यानि परिचिनोति।

**सहाय्यकानि**

देशभक्तिगीतानां पुस्तकानि, सान्द्रमुद्रिकाः च
महात्मनां जीवचरितानि (कैरल्याम्)

**अधिकविस्तरः**

1. पुरा भरतनाम्नोऽभूत्
राजा गुणसमन्वितः।
तेन पालितमित्यस्मात्
भारतं नाम कल्प्यते।।

2. अर्जुनोऽपि समाहूतः
गीतायां भारतेति च।
भरतस्य सगोत्रत्वात्
कृष्णेन बहुधा तथा।।

3. उत्तरस्यां च निर्भीकः
हिमवान् वर्तते तथा।
त्रिषु दिक्षु च तिष्ठन्ति
सागरा भारतस्य मे।

4. भाषाश्च विविधाः सन्ति
वेषाभूषाश्च सन्ति भोः।
धर्मश्च बहवस्तस्मात्
सर्वधर्मसमन्वितम्।।

5. यत्र शान्तिस्तु लोकेऽस्मिन्
यत्राहिंसा च दृश्यते।
तत्र जाता वयं सर्वे
पुण्यदेशे विधेर्बलात्।।

❐

## अष्टमः पाठः

# सुभाषितानि

**आमुखम्**

इतिहास पुराणेषु
तथा रामायणादिषु।
वचनं सारभूतं यत्
तत्सुभाषितमुच्यते।।

पृथिव्यां त्रीणि रत्नानि
रत्नमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु
रत्नसंज्ञा विधीयते।।

संस्कृतसाहित्ये सुभाषितानां प्रमुखं स्थानं वर्तते। अत एव नाटकादीनां रचनां विनैव भर्तृहरिः कविश्रेष्ठरूपेण परिगण्यते। मुक्तकरूपेण तेन लिखितं सुभाषितशतकत्रयं काव्यसौन्दर्येण सहृदयान् हठादाकर्षति। श्रृङ्गारशतकं, नीतिशतकं, वैराग्यशतकञ्चेति त्रयः ग्रन्थाः तेन लिखिताः।

इतिहास-महाकाव्य-नाटकादिषु च तत्र तत्र सुभाषितानि द्रष्टुं शक्नुमः। सुभाषितानां सङ्ग्रहग्रन्थाः बहवः सन्ति। सुभाषितभण्डागारः, सुभाषितसाहस्त्री, सुभाषितरत्नाकरः इत्यादयः तादृशाः ग्रन्थाः भवन्ति। महाभारतात् विदुरस्योपदेशान् क्रोडीकृत्य विदुरनीतिः इति नाम्ना कश्चन अपि सुभाषितग्रन्थः उपलभ्यते।

प्रायशः जीवने मानवानां सन्मार्गदर्शकानि भवन्ति सुभाषितानि। अतः शैशवादारभ्य सुभाषितानां श्रवणम्, अर्थावगमनञ्च सर्वेभ्यः अत्यन्तमुपकारकाणि भवन्ति।

**कालांशः** - **11**

**उद्देश्यानि** - सन्मार्गावबोधनम्
काव्यपरिचयः।
विद्यायाः महत्वबोधनम्।
धर्मस्य, सत्स्वभावस्य च माहात्म्यबोधनम्।

**आशयाः/ धारणाः/ व्यवहाररूपाणि।**

सुभाषितानि। विद्याप्रशस्तिः धर्मप्रशस्तिः सज्जनप्रशंसा।

**पठनप्रवर्तनानि/पठनतन्त्राणि**

सुभाषितालपनम्। मातृभाषया आशयकथनम्। वाक्यपूरणम्। चित्ररचना।
सुभाषितचयनम्। (विषयानुसारम्)।

**पठनाधिगमाः**

सुभाषितमालपति। आशयं मातृभाषया वदति। आशयं पूरयति।
आशयानुसारं चित्रं रचयति। सुभाषितानि आशयानुसारं सञ्चिनोति।

**प्रवर्तनम् -1**

**उद्देश्यम् - सतालं श्लोकालपनम्।**

**प्रक्रिया**

अध्यापकः कक्ष्यां प्रविश्य दैनिककार्यानन्तरं छात्रान् एवं पृच्छति। सर्वे गीतमिच्छन्ति खलु। तर्हि, एकं गीतं शृणुमः। एवमुक्त्वा अध्यापकः पूर्वमेव ध्वनिमुद्रणं कृत्वा आनीतं गीतं ("केयूराणि न भूषयन्ति पुरुषं.....") छात्रान् सङ्गणकयन्त्रं वा शब्दमुद्रिकामुपयुज्य वा श्रावयति।

अनन्तरम् अध्यापकः पृच्छतु-गीतमिदं पूर्वं श्रुतं वा? न स्यात्। यदा आकाशवाणी सर्वेषां गृहेषु आसन् तदा गीतमिदं आकाशवाण्याः प्रतिसप्ताहं श्रूयमाणमासीत्। मानवानां भूषणेषु एकमेव सदा शोभमानं तिष्ठति। सा तु विद्या। अन्यानि भूषणानि चिरस्थायिनः न सन्ति। हारादयः पुष्पैः निर्मिताः मनोहराः, किन्तु एकदिनाभ्यन्तरे तस्य नाशः भवति। अतः मानवानाम् उत्तमम् आभरणम् विद्या एव।

एतादृशाः उत्तमविचाराः सुभाषितमिति कथ्यते। लोके विद्यायाः अतीव महत्वं कल्पितमस्ति। विद्यायाः महत्वमधिकृत्य एकं सुभाषितं पठामः।

अध्यापकः प्रथमस्य सुभाषितस्य प्रथमपङ्क्त्याः पारायणं कृत्वा अनुवाचनाय छात्रान् प्रेरयति। पुनः प्रतिपादम् आदर्शवाचनं करोति, अनुकरणवाचनं कारयति च। पुनः सङ्घस्थाः छात्राः एकीभूय पारायणं कुर्वन्तु। एवं द्वितीयं सुभाषितमपि।

छात्राः सतालं सुभाषितद्वयम् आलपन्तु।

मूल्यनिर्णय सूचिकाः -
- अक्षरस्फुटतया वाचनम्।
- आशयव्यक्ततया वाचनम्।
- भागभागित्वम्।

**प्रवर्तनम् -2 -**

**उद्देश्यम् - सुभाषितालपनं मातृभाषया आशयकथनं च।**

**प्रक्रिया** :-

ततः “विद्या विभाति सर्वत्र” इति श्लोकम् उच्चैः पठति। छात्राः अनुगायन्तु। सामूहिकरूपेण द्वित्रिवारं श्लोकस्य आलपनानन्तरं वैयक्तिकरूपेण च छात्राः सुभाषितम् आलपन्तु।

पुनः अध्यापकः एकैकं पादं पठित्वा, प्रश्नं पृष्ट्वा मातृभाषया आशयं बोधयतु। ततः प्रतिपादं एकः छात्रः इति रीत्या आशयं वदतु। एवं सर्वेषां कृते कथनाय अवसरं ददातु।

पुन; विद्यायाः महत्वप्रतिपादकान् द्वित्रान् श्लोकान् (सुभाषितानि) श्रावयति अध्यापकः। तेषाम् अर्थोऽपि वक्तव्यः।

“प्रदोषे दीपकश्चन्द्रः” इति श्लोकस्यापि पाठनमेवं करोतु।

श्लोकयोः मातृभाषया आशयस्य कथनाय छात्रान् प्रेरयतु। आशयस्तु

1. വിദ്യ എല്ലായിടത്തും ശോഭിക്കുന്നു. എന്തുകൊണ്ടെന്നാൽ വിദ്യയാണ് ശ്രേഷ്ഠമായ ധനം. വിദ്യയാൽ എല്ലാം ലഭിക്കുന്നു. വിദ്യതന്നെയാണ് ശ്രേഷ്ഠമായ മോക്ഷം.

2. പ്രദോഷത്തിൽ (സന്ധ്യയിൽ) ദീപമായിട്ടുള്ളത് ചന്ദ്രനാണ്. പ്രഭാതത്തിൽ ദീപമായിട്ടുള്ളത് സൂര്യനാണ്. മൂന്ന് ലോകത്തിനും ദീപമായിട്ടുള്ളത് ധർമ്മമാണ്. നല്ല പുത്രൻ വംശത്തിന് ദീപമാണ്.

## विद्यासम्बन्धीनि सुभाषितानि -

विद्या ददाति विनयं
विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति
धनाद्धर्म ततस्सुखम्।।

नक्षत्रभूषणं चन्द्रः
नारीणां भूषणं पतिः।
पृथिवीभूषणं राजा
विद्या सर्वस्य भूषणम्।।

## सत्पुत्रप्रशंसापरं सुभाषितम्

एकेनापि सुवृक्षेण
पुष्पितेन सुगन्धिना।
वासितं विपिनं सर्वं
सुपुत्रेण यथा कुलम्।।

## धर्ममहिमापराणि सुभाषितानि

धर्मेण हन्यते शत्रुः
धर्मेण हन्यते ग्रहः।
धर्मेण हन्यते व्याधिः
यतो धर्मस्ततो जयः।।

नामुत्र हि सहायार्थं
पिता माता च तिष्ठतः।
न पुत्रदाराः न ज्ञाति-
र्धर्मस्तिष्ठति केवलः।।

अनित्यानि शरीराणि
विभवो नैव शाश्वतः।
नित्यं सन्निहितो मृत्युः
कर्तव्यो धर्मसङ्ग्रहः।।

**प्रवर्तनम् -3**

**उद्देश्यम्** - रिक्तस्थानपूरणम्।

**प्रक्रिया :-**

चार्ट्पत्रे अध्यापकः श्लोकस्य एकैकस्मात् पादात् एकैकं पदं त्यक्त्वा वाक्यरूपेण पादान् लिखतु।

**यथा -**

1. विद्यैव परमा.....।
2. विद्यया... लभते।
3. .................. दीपको रविः।

पुनः एकैकं वाक्यं पठित्वा त्यक्तं पदं योजयित्वा वाक्यकथनाय निर्दिशतु। ततः पाठपुस्तकसाहाय्येन छात्राः वाक्यानि पूरयन्तु। अध्यापकेन अधिकवाक्यानि देयानि। छात्राः यदा लिखन्ति तदा अध्यापकः आवश्यकं साहाय्यं ददातु।

उत्तराणि तु

1. विद्यैव परमा गतिः।
2. विद्यया लभते सर्वम्।

3. प्रभाते दीपको रविः।

पठनप्रवर्तनेषु वर्तमानस्य उत्तरे तु।

1. विद्या हि परमं धनम्।

2. प्रदोषे दीपकः चन्द्रः।

**प्रवर्तनम् 4**

**उद्देश्यम्-** चित्रं विलिख्य वर्णलेपनम्।

**प्रक्रिया :-**

अध्यापकः अङ्कनीमुपयुज्य प्रभातस्य वा प्रदोषस्य वा चित्रस्य रचनायै छात्रान् निर्दिशति। प्रवर्तनार्थं दत्ते स्थाने छात्राः चित्रं रचयन्तु। तदा आवश्यकाः निर्देशाः अध्यापकेन दातव्याः। चित्ररचनानन्तरम् उचितवर्णैः चित्रे लेपनाय वदतु। छात्राः तथा कुर्वन्तु। ततः वर्णयुक्तं चित्रं परस्परं विनिमाय ते मूल्यनिर्णयं कुर्वन्तु। अध्यापकः अपि मूल्यनिर्णयं करोतु। उत्तमचित्रकारं अभिनन्दतु च।

मूल्यनिर्णय सूचिकाः -
- चित्रस्य आशय बन्धिता।
- उचित वर्णलेपनम्।
- आकर्षकत्वम्।

इतिहासमधिकृत्य प्रश्नोत्तर प्रचालनाय उचिताः प्रश्नाः

## कोष्ठकात्समुचितमुत्तरं निर्धार्य लिखत

1. महाभारतस्य कर्ता कः?
   (व्यासः, वाल्मीकिः कालिदासः)

2. अस्माकं इतिहासः कः?
   (भगवद्गीता, भागवतम्, महाभारतम्)

3. महाभारते कति पर्वाणि सन्ति?
(12, 18, 20) - संस्कृताक्षरैः

4. कस्मिन् पर्वणि अन्तर्गता भवति भगवद्गीता?
(भीष्मपर्वणि, आदिपर्वणि, शान्तिपर्वणि)

5. भगवद्गीतायाः प्रधानवाक्यं किम्?
(सत्यमेव जयते, कर्मण्येवाधिकारस्ते, सत्यं वद धर्मं चर।)

6. पञ्चमो वेदः इति प्रसिद्धः ग्रन्थः कः?
(रामायणम्, महाभारतम्, कठोपनिषत्)

7. भगवद्गीतायां कः उपदिशति?
(श्रीकृष्णः, अर्जुनः, भीष्मः)

2. यथोचितम् योजयतु (कस्य माता का)?

| | | |
|---|---|---|
| अर्जुनः | - | गङ्गा |
| श्रीकृष्णः | - | सत्यवती |
| व्यासः | - | देवकी |
| दुर्योधनः | - | कुन्ती |
| भीष्मः | - | गान्धारी |

नवमः पाठः

# क्रीडाम। तुष्याम!

## आमुखम्

क्रीडाम तुष्याम इति पाठभागः एकं अभिनयगीतं भवति। अभिनयगीतं छात्राः सर्वे इच्छन्ति। कक्ष्यायां छात्राणां उत्साहवर्धनार्थम् उपकरोति। नूतनशब्दानां परिचयः सिद्ध्यति। निर्देशानुसारं क्रीडाद्वारा गानालपनं कर्तुं शक्नोति। छात्राः गीतात् नूतनशब्दान् ज्ञात्वा उत्साहेन क्रीडां कुर्वन्ति। चित्रेण सह पदयोजनम्, बिन्दून् योजयित्वा चित्रपूरणम्, बिन्दुयोजनेन अक्षरलेखनम् इत्यादीनि भिन्नभिन्नपठनप्रवर्तनानि अतर्भवन्ति। संस्कृतपठनतात्पर्यं वर्धयितुं एतादृशानि बालगीतानि अत्यन्तम् उपकारकाणि भवन्ति।

| | | |
|---|---|---|
| **कालांशः** | - | 10 |
| **उद्देश्यानि** | - | अभिनयगीतद्वारा, तथा क्रीडाद्वारा उत्साहवर्धनम्।<br>फलशाकादीनां परिचयः तथा क्रीडायाः परिचयः च भवति।<br>नूतनपदावलीपरिचयः। |
| **नैपुणी** | - | निर्देशान् अनुसृत्य कार्यकरणसामर्थ्यम्। |
| **ऐ.सी.टी साध्यताः** | - | बालकवितायाः भिन्नभिन्नसान्द्रमुद्रिकाः उपयुज्य प्रदर्शनम्। |

**आशयाः/ धारणाः/ व्यवहाररूपाणि।**

अक्षराणां पदानां च परिचयः।

क्रीडायाः परिचयः।

बिन्दून् योजयित्वा अक्षरलेखनम्।

पदवाचनम्।

फलादीनां परिचयः।

**पठनप्रवर्तनानि/पठनतन्त्राणि**

कवितां साभिनयं गायति।
नूतनपदानां परिचयद्वारा क्रीडा। क्रीडारीत्या गानालपनम्।
चित्रेण सह पदयोजनम्।
बिन्दून् योजयित्वा चित्रपूरणं तथा वर्णलेखनं च।
बिन्दून् योजयित्वा, अक्षरलेखनम्।
पदवाचनम्।

**पठनाधिगमाः**

संस्कृते बालकवितां श्रृणोति।
साभिनयं क्रीडां करोति।
नूतनपदानि परिचिनोति।
निर्देशमनुसृत्य कर्म करोति
चित्रसाहाय्येन पदलेखनम्

**प्रवर्तनम् 1**

**उद्देश्यम्** - **क्रीडया गानावतारणम्।**

**प्रक्रिया** - अध्यापकः कक्ष्यां प्रविस्य छात्रैः सह कुशलप्रश्नं करोति।

तव गृहं कुत्र अस्ति?
गृहे के के सन्ति?
माता किं करोति?
माता सर्वदा महानसे भवति वा?
महानसे किं किम् अस्ति ?

छात्राः गृहे प्रतिदिनं उपयुज्यमानानां धान्यानां शाकानां फलानां पात्राणां, गृहोपकरणानां नामानि प्रादेशिकभाषायां वदन्ति। तदनन्तरं अध्यापकः पृच्छति एतादृशवस्तूनि कुतः स्वीकुर्वन्ति। छात्राः उत्साहेन विपणीतः इति वदन्ति। अध्यापकः पुनः पृच्छति तर्हि भवन्तः सर्वे विपणीं गन्तुम् इच्छन्ति वा?। के इच्छन्ति?। छात्राः सर्वे अहमहमिति वदन्ति। तर्हि विपणीसम्बन्द्ध क्रीडासहितं अभिनयगीतं गायामः सर्वे सन्नद्धाः वा? छात्राः उत्साहेन सन्नद्धाः इति वदन्ति। अध्यापकः क्रीडाविपणिं सज्जीकरोति। द्वित्रवारं पुस्तके विद्यमानं गीतम् अध्यापकः साभिनयं उच्चैः आलपति। छात्राः निर्देशानुसारं तत् तत् आपणं गछन्ति।

छात्राः अक्षराणि पदानि च परिचिन्वन्ति। तदनन्तरं एकैकां पङ्क्तिं साभिनयं गायति। आलपनाय छात्रान् प्रेरयति। अध्यापकः एकैकां पङ्क्तिम् उक्त्वा आलपनाय प्रेरयति। अनन्तरं छात्रान् सङ्घान् कृत्वा गीतं क्रीडाद्वारा आलपनाय अभ्यासाय च प्रेरयति।

ततः छात्रसद्धाः क्रीडागानम् आलपन्तु। अभिनयन्तु च।

मूल्यनिर्णय सूचिकाः -
- गानं पूर्णमवतारितम्
- उचितः अभिनयः।
- सङ्घाङ्गानां भागभागित्वम्।

**प्रवर्तनम् -2**

**उद्देश्यम् - चित्रं दृश्ट्वा पदज्ञानम्।**

**प्रक्रिया :-**

अध्यापकः विपण्यां विद्यमानानां परिचितफलानां, शाकानां, इतरभक्ष्यवस्तूनां च नामानि चार्ट्पत्रस्य साहाय्येन उच्चैः वदति। छात्राः चार्ट् पत्रं दृष्ट्वा अभ्यासं कुर्वन्ति। चित्रसाहाय्येन छात्राः पदानि वक्तुं समर्थाः भवन्ति।


सेवम


कदलीफलम्,


आम्रम्


पनसम् च।


द्राक्षाफलम्

**मूल्यनिर्णयसूचिकाः**

1. चित्रसाहाय्येन पदलेखनम्।
2. स्पष्टतया लेखनम्।
3. प्रत्यभिज्ञानम्।

**प्रवर्तनम् -3**

**उद्देश्यम् - वर्णलेपनसामर्थ्यम्।**

**प्रक्रिया :**

बिन्दून् योजयित्वा सेवफलस्य चित्ररचनां कुर्वन्तु छात्राः। ते उचितवर्णैः लिम्पन्तु च।

**मूल्यनिर्णयसूचिके**

1. वर्णलेपनसामर्थ्यम्।
2. उचितवर्णस्य स्वीकारः।

**प्रवर्तनम् - 4**

**उद्देश्यम् - अक्षरपरिचयः।**

**प्रक्रिया** :-

अध्यापकसाहाय्येन छात्राः बिन्दून् योजयित्वा अक्षरलेखनं कुर्वन्ति। अक्षराणां परिचयं प्राप्नोति। पदवाचनं भवति। पुस्तिकासु लिखितं परिशोध्य मातृकारूपेण फलके एवं लिखतु। क्रीडामि। आपणम्।

**मूल्यनिर्णयसूचिकाः**

1. अक्षरलेखनम्।
2. स्पष्टतया पदवाचनम्।
3. पदार्थज्ञानम्।

**प्रवर्तनम् - 5**

**उद्देश्यम् - टवर्गाक्षराणां लेखनम्।**

**प्रक्रिया**

छात्रान् पञ्चसङ्घान् करोत्। (व टि का, पी ठः, षड्, मू ढः, ना ण कः)

अध्यापकन पूर्वमेव सज्जीकृतानि अक्षराणि एकैकं चिटिकासु विलिख्य स्थाव्यताम्। सङ्घाङ्गाति एकैकः आगत्य एकैकां चिटिकां स्वीकृत्य तत्रत्यमक्षरम् उच्चैः पठतु, फलके लिखतु च। यः पदम् पूर्णतया प्रथमं लिखति सः अभिनन्दनीयः। सर्वेषां लेखनानन्तरम् अध्यापकः पञ्च पदानि फलके विलिख्य प्रदर्शयतु।

अनुबन्धप्रवर्तनानि -

1. अक्षरचित्राणां रचनां कर्तुं शक्नोति।
2. अभिनयगीतानां प्रदर्शनद्वारा परिचयं कर्तुं शक्यते।
3. वस्तूनां चार्ट्पत्रं प्रदर्श्य नूतनपदानां परिचयः, तथा वाचनावसराश्च दातुं शक्यन्ते।

## दशमः पाठः

# रामदासस्य कौशलम्

**आमुखम्**

कथाः के वा न इच्छन्ति?

कथाः विनोददायिकाः विज्ञानदायिकाः, उपदेशात्मिकाः इत्येवं बहुधा विभक्तुं शक्यन्ते। विष्णुशर्मणा विरचितं पञ्चतन्त्रम्, नारायणपण्डितेन विरचितः हितोपदेशः, सोमदेवभट्टेन विरचितः कथासरित्सागरः इत्यादयः प्रशस्ताः कथासमाहारग्रन्थाः भवन्ति। भारतराष्ट्रस्य सांस्कृतिकभूमिकायां कथासाहित्यस्य प्रमुखं स्थानं द्रष्टुं शक्नुमः।

प्रायशः संस्कृतकथाग्रन्थाः सन्मार्गबोधकाः भवन्ति। अतः बाल्यादेव कथाश्रवणं, कथावाचनम् च सर्वेषां कृते अत्यन्तं हितकरे। एतद्द्वयं भाषाभ्यासाय अत्यन्तम् उपकारकं च।

| | | |
|---|---|---|
| **कालांशः** | **-** | **12** |
| आशयः | - | अतिलोभः अनर्थकारणं भवति। |
| उद्देश्यानि | - | कथाश्रवणतात्पर्यवर्धनम्। |
| | | कथाकथने तात्पर्यम्। |
| | | चवर्गाक्षराणां लेखनपरिचयः। |
| | | 'च्छ' 'ज्ज' इति संयुक्ताक्षरयोः लेखनपरिचयः। |
| | | कथापात्राभिनये तात्पर्यम्। |
| नैपुण्यानि | - | कथाकथनसामर्थ्यम्। |
| | | आशयक्रमीकरणसामर्थम्। |
| | | लघुवाक्यानि वदति। |
| | | उचितभावान् प्रकटयति। |
| | | चवर्गाक्षराणि लिखति। |
| सहायकग्रन्थाः | - | ऐतिह्यमाला।, पञ्चतन्त्रम् |

## आशयाः/ धारणाः/ व्यवहाररूपाणि।

कथा।

अतिलोभः अनर्थाय भवति।

लघुवाक्यानि। प्रश्नवाचकशब्दाः।

च छ ज झ ञ।

च्छ, ज्ज इति संयुक्ताक्षराणि।

## पठनप्रवर्तनानि/पठनतन्त्राणि

छात्राः परिचितकथाः वदन्ति।
कथावतारणम्।
अध्यापकः चित्रसाहाय्येन कथां वदति।
चित्रक्रमीकरणम्।
कथाचित्राणि क्रमीकृत्य कथां मातृभाषया छात्राः वदन्ति।
(सङ्घप्रवर्तनम्)
कथावाचनम्।
अध्यापकः कथां पठति।
छात्राः अनुवाचनं कुर्वन्ति।
प्रश्नानामुत्तरलेखनम्। अक्षरेण पदपूरणम्।
(बिन्दुयोजनम्)
अर्थलेखनम्।
वाक्यपूरणम्।
सम्भाव्यकथनम्।
अक्षरलेखनम्।

**पठनाधिगमाः**

कथाकथनसामर्थ्यम् । श्रद्धया कथां शृणोति।
आशयक्रमीकरणम्।
वाचनसामर्थ्यं प्रकटयति।
लघुवाक्यानि वदति लिखति च।
पदसम्पत्तिः वर्धते।
लेखनपरिचयः।
शब्दकोशं निरीक्ष्य अर्थं लिखति। वाक्यलेखनं करोति।
सम्भावनां कृत्वा उत्तरं वदति।
अक्षरलेखनं करोति।

**प्रवर्तनम् 1**

**उद्देश्यम् - परिचितकथाकथनम्।**

**प्रक्रिया** :-

अध्यापकः परिचितकथानां कथनाय छात्रान् निर्दिशति। द्वित्राः छात्राः मातृभाषया परिचिताः कथाः वदन्तु।

मूल्यनिर्णय सूचिकाः -
- स्फुटोचारणम्
- काक्वनुसारं सम्भाषणांशान् वदति
- उचित भावं प्रकटयति।

**प्रवर्तनम् 2**

**उद्देश्यम् - कथाकथनम्।**

**प्रक्रिया** :-

अध्यापकः "रामदासस्य कौशलम्" इति पाठस्य चित्राणि उपयुज्य कथां वदति। छात्राणाम् अवधानतायै मध्ये मध्ये "धनिकस्य नाम किम्"? "रामदासः कीदृशः अस्ति' इत्यादीन् प्रश्नान् पृच्छतु। ततः छात्रेभ्यो तत्कथाकथनाय आप अवसरं ददति।

**प्रवर्तनम् 3**

**उद्देश्यम्  -  चित्रक्रमीकरणम्।**

**प्रक्रिया** :-

अध्यापकः सङ्ख्यानुसारं छात्राणां गणनिर्माणं करोतु। पुनः पूर्वसज्जीकृतानां कथाचित्राणां प्रतिकृतिः छात्रेभ्यः वितरतु। कथानुसारं छात्राः चित्राणि क्रमीकुर्वन्तु। पुनः मातृभाषया चित्रसाहाय्येन गणेषु कथां वदन्तु। तदनन्तरं प्रतिगणं एकः कथां मातृभाषया उच्चैः वदतु। आवश्यकं प्रोत्साहनं देयम्।

**प्रवर्तनम् 4**

**उद्देश्यम्  -  कथावाचनम्।**

**प्रक्रिया** :-

अध्यापकः पाठस्य आदर्शवाचनम् करोतु। तदनन्तरं छात्राः अनुवाचनं कुर्वन्तु।

प्रतिवाक्यम् आदर्शवाचनानुसारं सर्वे छात्राः अनुवाचयन्तु। छात्रेभ्यः उचितं साहाय्यं अध्यापकेन देयम्।

**प्रवर्तनम् 5**

**उद्देश्यम्  -  उत्तरं वदतु लिखतु।**

**प्रक्रिया** :-

अध्यापकः पाठपुस्तके विद्यमानान् त्रीन् प्रश्नान् पृच्छतु। प्रश्नस्य उत्तरकथनाय अवसरं ददातु। छात्रेण उक्तम् उत्तरं समीचीनं चेत् अध्यापक; उत्तरं फलके लिखतु। छात्राः अनुलिखन्तु। एकस्य उत्तरलेखनानन्तरमेव अग्रिमः प्रश्नः प्रष्टव्यः। छात्रैः लिखितानि उत्तराणि अध्यापकः निरीक्षताम्

शब्दकोशस्य सहाय्येन अर्थलेखनम्। अर्था अधः दीपन्ते।

1. कौशलम्  -  സൂത്രം
2. गच्छति  -  പോകുന്നു

3. प्रतिगच्छति - തിരിച്ചുപോകുന്നു

4. मम - എന്റെ

**प्रवर्तनम् 6**

**उद्देश्यम् - उचितपदेन वाक्यपूरणम्**

**प्रक्रिया** :-

अध्यापकः निर्दिष्टपदानि एकैकशः फलके लिखतु। पुनः छात्राः पदानि लिखन्तु। पुनः वाक्यं पूर्णतः उच्चरन्तु।

1. रामदासः पात्रं याचते।
2. धनपालः सुवर्णपात्रं ददाति।
3. धनिकः लज्जितः प्रतिगच्छति।

**प्रवर्तनम् 7**

**उद्देश्यम् - परिचिताः कथाः छात्राः अवतारयन्तु।**

**प्रक्रिया** :-

अध्यापकः परिचिताः कथाः प्रादेशिकभाषया वक्तुं छात्रेभ्यः अवसरं ददातु। छात्राः वदन्तु। तत्र मध्ये मध्ये तेभ्यः साहाय्यं ददातु। अन्ते कथामेकां कथाद्वयं वा अध्यापकः वदन्तु। कथाद्वयम् अधो दीयते।

## ഐക്യമാണ് ബലം

ഒരിടത്ത് പക്ഷികൾ തിങ്ങിപ്പാർക്കുന്ന വലിയൊരു ഇലവുമരമുണ്ടായിരുന്നു. ഒരിക്കൽ ഒരു കാട്ടാളൻ അതുവഴിപോയപ്പോൾ അയാൾ ധാരാളം പക്ഷികളെ ക്കണ്ട് ഇപ്രകാരം ചിന്തിച്ചു - “നാളെത്തന്നെ ഒരു വലയുമായി വന്ന് ഈ പക്ഷി കളെ പിടിക്കണം - കുറെയെണ്ണത്തിനെ ചുട്ടുതിന്നണം. ബാക്കിയുള്ളവയെ അങ്ങാ ടിയിൽ കൊണ്ടുപോയി വിൽക്കാം.” അയാൾ അടുത്ത ദിവസം രാവിലെ ഇലവുമ രത്തിന്റെ ചുവട്ടിൽ വലവിരിച്ചു. എന്നിട്ട് അവിടവിടെയായി ധാന്യമണികൾ വിതറി.

പക്ഷികളെല്ലാം ഇരതേടാൻ പോയിരുന്നു. എന്നാൽ ഒരു കാക്ക ഇതെല്ലാം കാണുന്നുണ്ടായിരുന്നു. അവൻ മറ്റുപക്ഷികൾ വന്നപ്പോൾ പറഞ്ഞു. "കൂട്ടുകാരെ ഈ മരത്തിന്റെ ചുവട്ടിൽ വലവിരിച്ചിട്ടുണ്ട്. അതുകൊണ്ട് ആരും ധാന്യമണികൾ തിന്നാൻ പോകരുത്". കാക്കയുടെ ഉപദേശം എല്ലാ പക്ഷികളും സ്വീകരിച്ചു. ആരും ധാന്യമണികൾ തിന്നാൻ പോയില്ല. വലയിൽ കുരുങ്ങിയതുമില്ല.

എന്നാൽ ഒരു സംഘം പ്രാവുകൾ ധാന്യമണികൾ കണ്ട് അവിടെയിറങ്ങി. അവ കൊത്തിത്തിന്നാൻ തുടങ്ങി. എല്ലാവരും വലയിൽ കുടുങ്ങി. പ്രാവുകളുടെ രാജാവായ ചിത്രഗ്രീവൻ പറഞ്ഞു. "നമ്മൾ ആപത്തിൽപെട്ടിരിക്കുന്നു. ദുഃഖിച്ചിട്ട് കാര്യമില്ല, നമുക്ക് എല്ലാവർക്കും ഒന്നിച്ചു പറക്കാം." അവർ എല്ലാവരും ഒന്നിച്ച് മുകളിലേക്ക് പറന്നു. എല്ലാവരുടെയും ശക്തി ഒരുമിച്ചപ്പോൾ വല കെട്ടിയ ഇട ത്തുനിന്നും ഇളകി. പ്രാവിൻകൂട്ടം ചിത്രഗ്രീവന്റെ സുഹൃത്തായ എലിയുടെ അടു ത്തെത്തി. എലി ആ വല മുറിച്ചുകൊടുത്തു. അങ്ങനെ പ്രാവുകൾ വലയിൽ നിന്ന് രക്ഷപ്പെട്ടു. എലിയോട് നന്ദിപറഞ്ഞ് പ്രാവുകൾ യാത്രയായി. കൂട്ടുകാരെ, ഐക്യ മാണ് ബലം എന്ന് ഈ കഥയിൽ നിന്ന് മനസ്സിലാക്കാം.

**प्रवर्तनम् 8**

**उद्देश्यम् - पाठस्याशयं ज्ञात्वा उत्तरकथनं लेखनं च।**

**प्रक्रिया :-**

अध्यापकः प्रतिवाक्यम् आदर्शवाचनं कृत्वा अनुवाचनं कारयित्वा आशयस्य प्रादेशिकभाषया कथनाय छात्रान् प्रेरयति। छात्राः वदन्ति। पुनः लघुप्रश्नानां संस्कृते उत्तरं वदन्तु छात्राः उत्तराणि फलके विलिख्य छात्रपुरस्सरं प्रदर्शयति। छात्राः स्वस्वपुस्तिकासु लिखन्तु। अध्यापकः छात्रैर्लिखितं परिशोधयतु।

| | |
|---|---|
| धनपालः कीदृशः भवति? | धनिकः अत्याग्रही च। |
| कः पात्रं याचते? | रामदासः। |
| प्रसवे कौ मृतौ? | सुवर्णपात्रं पोतश्च। |

एकादशः पाठः

# भागवद्गीता

## आमुखम्

महाभारतम् अस्माकं महत्त्वपूर्णः इतिहासः भवति। 'इति ह' इति पारम्पर्योपदेशे अर्थे अव्ययम् अस्ति। इतिह आस्ते अस्मिन् इति इतिहासः। इति ह आस। इति एवं प्रकारेण। 'ह प्रसिद्धार्थे। आस 'आस उपवेशने' इत्यस्य लिट्। एवम् अनेन प्रकारेण प्रसिद्धिं अत्रावर्तत' इत्यर्थोऽप्यस्ति। तत्तद्देशेषु, यानि यानि पुरावृत्तानि आसन् तेषां समाहारः भवति इतिहासः।

"धमार्थकाममोक्षाणामुपदेशसमन्वितम्
पूर्ववृत्तपरामर्शमितिहासं प्रचक्षते"

इत्यस्ति इतिहासलक्षणम्। महाभारतं वेदव्यासेन कृतः इतिहासः भवति। अस्मिन् शतसहस्रं श्लोकाः विद्यन्ते। अनेन 'शतसहस्रीसंहिता' इति नाम अस्ति महाभारतस्य। वेदानामर्थाः प्रायः सामान्यजनैः दुर्ज्ञेयाः। सामान्यजनानामपि उपयोगाय व्यासेन वेदानां समस्तसारभूतं महाभारतं रचितम्। तस्मात् महाभारतस्य 'पञ्चमो वेदः' इत्यपि नाम अस्ति।

महाभारते अष्टादश पर्वाणि सन्ति। तेषु भीष्मपर्वणि अन्तर्गता भवति भगवद्गीता। भगवद्गीतायाः अष्टादश अध्यायाः सन्ति। भगवद्गीता इति ग्रन्थनाम कथं स्त्रीलिङ्गे प्रयुक्त इत्यत्र एकः न्यायः अस्ति। भगवद्गीतायाः पूर्णनाम भगवद्गीतोपनिषत् (भगवद्गीता - उपनिषत्) इति। 'उपनिषद्' शब्दः दकारान्तः स्त्रीलिङ्गः। विशेष्यविशेषणयोः तुल्यलिङ्गत्वे भगवद्गीता इति स्त्रीलिङ्गत्वम्।

कौरवपाण्डवयोः मिथः युद्धः अनिवार्यः इति अवस्था सञ्जाता। उभौ पक्षौ युद्धाय सन्नद्धौ अभवताम्। पाण्डवेषु अर्जुनस्य सारथिरूपेण साहाय्यं कर्तुं निश्चितवान् कृष्णः। अर्जुनः शत्रुपक्षस्थान् वीरान् द्रष्टुम् आकाङ्क्षाम् प्रकटयति। सारथिः श्रीकृष्णः उभयो पक्षयोः मध्ये रथं स्थापयति। शत्रुपक्षे पितृस्थानीयान् सहोदरस्थानीयान् गुरुस्थानीयान् पुत्रस्थानीयान् च वीरान् दृष्ट्वा विविधविकारैः श्रान्तः भवति अर्जुनः। सः युद्धे विमुखः

अभवत्। तस्मिन् स्वकर्मणि औत्सुक्यं जनयितुं श्रीकृष्णः सप्तशतैः श्लोकैः तम् उपदिदेश। तमुपदेशं व्यासः संगृहीतवान्। एषः उपदेशः एव भगवद्गीता इति ग्रन्थः।

एषा भगवद्गीता सर्वोपनिषदां सारभूता भवति। सांख्ययोगदर्शनयोः सारः च अस्यां वर्तते। भक्तियोगः अपि वैपुल्येन कथ्यते। उच्यते च-

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।। इति।

'कर्मण्येवाधिकारस्ते' इति गीतावाक्यं प्रसिद्धं भवति। अत्र कांश्चन श्लोकान् परिचिनोतुं छात्रेभ्यः अवसरः देयः।

**कालांशः - 16**

**आशयाः/ धारणाः/ व्यवहाररूपाणि।**

गीतायाः परिचयः।
गीतोपदेशस्य दृश्याविष्कारः।
महाभारतस्य प्रधानकथापात्राणां परिचयः। गीतायाः श्लोकस्य आलपनम्।
गीतायाः प्रधानवाक्यानां परिचयः।
प्रश्नानाम् उत्तरकथनम्।

**पठनप्रवर्तनानि/पठनतन्त्राणि**

दृश्याविष्कारः।
कथापात्रपरिचयः लघुविवरणरूपेण दीयते।
श्लोकालपनम्।
चार्ट्पत्रमुपयुज्य प्रधानवाक्यानां परिचायनम्।

**पठनाधिगमाः**

सन्दर्भं परिचिनोति।
कथापात्राणि परिचिनोति।
आलपननैपुणी।
गीतायाः प्रधानवाक्यचयनम्।
प्रश्नानाम् उत्तरकथने सामर्थ्यम्।

**प्रवर्तनम् 1**

**उद्देश्यम् - भगवद्गीतायाः परिचयः।**

**प्रक्रिया** :-

भगवद्गीतापुस्तकं प्रदर्श्य अध्यापकः वदति। एतस्य पुस्तकस्य नाम भगवद्गीता इति। कस्य कस्य गृहे भगवद्गीता अस्ति? केचन उत्थाय वदन्ति - "मम गृहे, मम गृहे।" "भगवद्गीतायाः प्राधान्यं जानन्ति वा"? भगवद्गीता भक्तिपूर्वं पठ्यते इति कश्चन वदति। एवं चेत् श्रृणु। भारतस्य इतिहासौ कौ? रामायणं, महाभारतं च इति छात्राः वदन्ति। महाभारतं केन विरचितम्? वेदव्यासेन इति छात्राः वदन्ति। महाभारतं कथं विभक्तम्? पर्वरूपेण। महाभारते कति पर्वाणि सन्ति? अष्टादश (18)। कस्मिन् पर्वणि अन्तर्भवति भगद्गीता? भीष्मर्वणि। इत्यादीनि प्रश्नोत्तराणि चार्ट्पत्रे विलिख्य प्रदर्शयतु वाचयतु च अध्यापकः। प्रश्नानाम् उत्तराणि वक्तुं छात्रेभ्यः अवसरः देयः। उत्तरं न लब्धं चेत् अध्यापकः साहाय्यं करोतु। आशयमपि विशदीकरोतु।

ततः कक्ष्यायां गीतोपदेशस्य निश्चलदृश्यं सज्जीकरोतु। चत्वारः अश्वाः। सारथिः कृष्णः। समीपे अर्जुनः। कृष्णः गीतोपदेशं करोति। चत्वारः छात्राः अश्वरूपेण तिष्ठन्तु। एकः कृष्णः। एकः अर्जुनः। ते उचितभावेन तिष्ठन्तु।

**मूल्यनिर्णयसूचिके** - उचितप्रतिकरणम्, उचितभावः।

**प्रवर्तनम् 2**

**उद्देश्यम् - महाभारतस्य प्रधानकथापात्राणां परिचयः।**

**प्रक्रिया** :-

अध्यापकः मातृभाषाया महाभारतस्य वंशावलिं चित्रसहितं प्रदर्शयति। एकं छात्रं आहूय एकैकस्य चित्रं स्पृष्ट्वा अस्य माता का? पिता कः? इति क्रमेण पृच्छति। एषः युधिष्ठिरः। तस्य पिता पाण्डुः। युधिष्ठिरस्य माता का? पाण्डवानां नामानि कानि?

दुर्योधनस्य माता का? पिता कः? इत्यादीन् प्रश्नान् पृच्छति। छात्राः यथाशक्यं उत्तराणि वदन्ति। तत्समये अध्यापकः विशदीकरोति। कथां मातृभाषया च वदतु अध्यापकः।

**प्रवर्तनम् 3** -

**उद्देश्यम्** - **गीताश्लोकस्य आलपनम्।**

अध्यापकः वदति - "अद्य एकैकः एकं गीताश्लोकं चित्वा आगन्तुं निर्दिष्टवान् खलु?" 'आम्' इति छात्राः वदन्ति। श्लोकं चितवन्तः सर्वे? बहवः छात्राः आम् इति वदन्ति। केचन छात्राः श्लोकचयनं न कृतवन्तः तेभ्यः अध्यापकः गीतापुस्तकं दत्वा लेखनाय प्रेरयति। आलपनाय शक्ताः ये ते श्लोकालपनाय निर्दिश्यते अध्यापकेन। एकैकस्य आलपनानन्तरं अक्षरस्फुटतया उचिततालेन च अध्यापकः तत्तच्छ्लोकम् आलपति। एवं सर्वे छात्राः एकैकं श्लोकम् आलपन्ति।

**मूल्यनिर्णयसूचिकाः** - अक्षरस्फुटता, तालात्मकता, उचितभावः।

**प्रवर्तनम् 4**

**उद्देश्यम्** - **गीतायाः प्रधानवाक्यानां परिचायनम्।**

**प्रक्रिया** :-

अध्यापकः चार्ट्पत्रे कानिचन गीतावाक्यानि कैरल्यां विलिख्य प्रदर्शयतु। वाचयतु च।

यथा - कर्मण्येवाधिकारस्ते समोऽहं सर्वभूतेषु।
न मे द्वेष्योऽस्ति न प्रियः।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।

तेषाम् आशयमपि परिचाययतु। अक्षरस्फुटतया वाचनाय छात्रान् निर्दिशतु।

**मूल्यनिर्णयसूचिके** - अक्षरस्फुटता, उचितभावः

**प्रवर्तनम् 5**

**उद्देश्यम्** - **प्रश्नानाम् उत्तरकथनं लेखनं च।**

**प्रक्रिया** :-

अध्यापकः पाठपुस्तकस्थान् प्रश्नान् (पुटसंख्या 54) वाचयतु। तस्य आशयं कैरल्यां वदतु। तदनन्तरम् उत्तरकथनाय प्रेरयतु। छात्राः उत्तराणि वदन्ति।

1. अस्माकम् इतिहासकाव्यं किम्?
   महाभारतम्।
2. भगवद्गीता कस्मिन् पर्वणि अन्तर्भवति।
   भीष्मपर्वणि।
3. कः अर्जुनम् उपदिशति?
   श्रीकृष्णः।
4. भगवद्गीतायां कति अध्यायाः सन्ति?
   अष्टादश।

अध्यापकेन सन्नाहीकृतं चार्ट्पत्रं प्रदर्शयतु। टिप्पणिपुस्तके लेखनाय छात्रान् प्रेरयतु।

**मूल्यनिर्णयसूचिकाः** - आशयव्यक्तता, उचितभावः, अक्षरज्ञानम्।

## अधिकविस्तरः

**एकश्लोकी गीता**

यत्र योगेश्वरः कृष्णो
यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिः
धृता नीतिर्मतिर्मम।।

### गीताध्यानम्

1. पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयम्
व्यासेन ग्रथितां पुराणमुनिना मध्ये महाभारतम्।
अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनीम्
अम्ब त्वामनुसन्दधामि भगवद्गीते भवद्वेषिणीम्।।

2. नमोऽस्तु ते व्यास विशालबुद्धे
फुल्लारविन्दायतपत्रनेत्र।
येन त्वया भारततैलपूर्णः
प्रज्वालितो ज्ञानमयः प्रदीपः।।

### भगवान् भगवद्गीता च

ऐश्वर्यस्य समग्रस्य
धर्मस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव
षण्णां भग इतीरणाः।। (विष्णुपुराणम्)

(समग्रस्य ऐश्वर्यस्य, धर्मस्य, यशसः, श्रियः ज्ञानस्य, वैराग्यस्य च भगः इति नाम)

भगः यस्य अस्ति सः भगवान् भगवता गीता भगवद्गीता।

### सहायकाः

| | |
|---|---|
| भगवद्गीता | कैरलीव्याख्यानसहिता |
| भगवद्गीता | सान्द्रमुद्रिका |

### उत्तराणि (भगवद्गीता)

कोष्ठकात्समुचितस्य उत्तरस्य चयनम्।

1. व्यासः।

2. महाभारतम्।

3. अष्टादश (18)।

4. भीष्मपर्वणि।

5. कर्मण्येवाधिकारस्ते।

6. महाभारतम्।

7. श्रीकृष्णः।

**2. यथोचितं योजनम्**

| | | |
|---|---|---|
| अर्जुनः | - | कुन्ती |
| श्रीकृष्णः | - | देवकी |
| व्यासः | - | सत्यवती |
| दुर्योधनः | - | गान्धारी |
| भीष्मः | - | गङ्गा। |

## प्रश्नसञ्चिका

1. अक्षराणि योजयित्वा पदानि पूरयत

1. ———— वनम्। (भ, कु, पि)
2. ———— कः। (क, भे, च)
3. क————लम्। (भ, म, त)
4. ———— धुरम्। ( कि, स, म)
5. ———— लम्। (गि, व, फ)
6. हिमा————यः। (त, ल, म)
7. विद्या ————यः। (वि, आ, ल)
8. ————नम्। (वि, व, प)
9. नि————यः। (ली, ल, क)

10. का————। (म, कः, च)
11. शु————। (कः, मा, त)
12. परि————मः। (श, श्र, ज)
13. निल————। (यः, या, यि)
14. ————रारिः। (श, शा, शु)
15. ————ग्रुः। (शि, शु, श)
16. ————ति। (ति, क, का)
17. द————। (प, श, क)
18. कोकि————। (चि, त, लः)
19. ————शः। (दे, दो, दु)
20. ————व। (ते, त, तु)
21. भार————म्। (त, तु, द)
22. मा————। (ता, त, क)
23. से————म्। (वि, व, वु)
24. क्री————ति। (ड, ठ, क)
25. ज————नी। (न, ण, च)
26. सूर————। (ण, णः, णि)
27. परिश्रमे————। (ण, न, नि)
28. ————त्रम्। (चि, चु, ज)
29. मरी————। (ज, चम्, म)
30. ————न्द्रः। (श, त, च)

2. चित्रं पदेन सह योजयतु

| | | | | |
|---|---|---|---|---|
|  | सूनम् | | भेण्डम् |  |
|  | चित्रपतगः | | रक्तफलम् |  |
|  | चिक्रोडः | | मरीचम् |  |
|  | खगः | | सूरणः |  |
|  | कुक्कुटः | | शिग्रुः |  |
|  | श्येनः | | मीनः |  |
|  | शुनकः | | कारवेलम् |  |
|  | सूर्यः | | | |
|  | आम्रम् | | | |
|  | कदलीफलम् | | | |
|  | द्राक्षाफलम् | | | |
|  | सेवम् | | | |
|  | पात्रम् | | | |

3. चित्रं दृष्ट्वा, प्रदत्तानां प्रश्नानाम् उत्तरं वदतु।

1. श्येनः किम् करोति?

---- ----------

2. शुनकः किं करोति?

---- ---------

3. शरारिः कं गृह्णाति?

---- ---------

4. कति कदलीफलानि सन्ति?

---- ---------

5. कति खगाः सन्ति?

---- ---------

4. प्रश्नानाम् उत्तरं वदत

1. विद्यया किं लभते?
2. परमं धनं किम्?
3. प्रभाते कः दीपकः?
4. प्रदोषे कः दीपकः?
5. कुलदीपकः कः?
6. त्रैलोक्यदीपकः कः?

5. गणे कः न अन्तर्भवति? तस्य नाम वदतु।

1. दीपः चन्द्रः, तारकम्

2. भेण्डः, गजः, सूरणः

6. गणनां कुर्वन्तु-

 फलानि पुष्पाणि 

 शाकाः मृगाः 



वाहनानि बालकाः



7. बिन्दून् योजयित्वा वर्णैः लिम्पतु -









प्रश्नसञ्चिकायाः उत्तराणि

I. 1. भानम्। 2. भेकः। 3. कमलम्। 4. मधुरम्। 5. फलम्।

6. हिमालयः। 7. विद्यालयः। 8. वनम्। 9. निलयः। 10. काकः।

11. शुकः। 12. परिश्रमः। 13. निलयः। 14. शरारिः। 15. शिग्रुः।

16. कति। 17.दश। 18. कोकिलः। 19. देशः। 20. तव।

21. भारतम्। 22. माता। 23. सेवम्। 24. क्रीडति। 25. जननी।

26. सूरणः। 27. परिश्रमेण।28. चित्रम्। 29. मरीचम्। 30. चन्द्रः।

II. अध्यापकः पदेन चित्रस्य योजनाय निर्देशः देयः। छात्रेभ्यः पर्याप्तं साहाय्यं देयम्।

III. 1. श्येनः कुक्कुटशावकं गृह्णाति।

2. शुनकः भषति।

3. शरारिः मीनं गृह्णाति।

4. त्रीणि कदलीफलानि भवन्ति।

5. त्रयः खगाः सन्ति।

IV. 1. विद्यया सर्वं लभते।

2. परमं धनं विद्या।

3. प्रभाते रविः दीपकः।

4. प्रदोषे चन्द्रः दीपकः।

5. कुलदीपकः सुपुत्रः।

6. त्रैलोक्यदीपकः धर्मः।

V. 1. सेवम्।

2. शुनकः

VI. 1. त्रीणि फलानि।

2. चत्वारः शाकाः।

3. पञ्चवाहनानि।

4. षट् पुष्पाणि।

5. सप्त मृगाः।

6. अष्टौ बालकाः।

VII. बिन्दून् योजयित्वा वर्णैः लेपनाय छात्रान् अध्यापकः प्रेरयतु। पर्याप्तं साहाय्यं च ददातु।

## पाठासूत्रणम् दैनिकासूत्रणम्।

## कक्ष्या - द्वितीया

| | | |
|---|---|---|
| पाठभागः | - | काकः शरारिः च। |
| आशयः | - | परिश्रमेण जीवितं वरमिति प्रतिपादिका कथा।<br>परोपकारः सदा सर्वैः करणीयः। |
| व्यवहाररूपम् | - | कथा तदान्वे स्वावलम्बेन जीवनाय सर्वेऽपि यत्नः मनोभावः कथारूपणे तात्पर्य– रणीयः। |
| पठनाधिगमः | - | आशयानुसारं चित्ताणि क्रमीकरोति। |
| पठनोपकरणानि | - | पाठपुस्तकम्, हस्तपुस्तकम्, पञ्चतन्त्रकथापुस्तकम्, चार्ट्पत्राणि, चित्राणि लघुकथापुस्तकानि, सान्द्रमुद्रिकाः। |

### पठनप्रवर्तनानि

अध्यापकः पाठभागप्रवेशाय काकस्य कौशलम् इति कथायाः चार्ट्पत्रं प्रदर्श्य प्रादेशिकभाषायाम् अवतारति।

प्रियाः छात्राः, कथा सम्यक् अस्ति वा? कथायाः आशयः अवगतः वा? कथायाः सारांशः कः? इत्यादीन् प्रश्नान् पृच्छति। अध्यापकः पाठभागस्थां कथां साभिनयं कक्ष्यायाम् अवतरति। आशयविशदीकरणं करोति।

अध्यापकः आशयानुसारं चित्रं प्रदर्श्य प्रश्नान् पृच्छति। छात्राः उत्तरं वदन्ति। अध्यापकः प्रश्नस्य उत्तरं फलके लिखति। अध्यापकेन लिखितम् उत्तरं पाठभागस्थमिति छात्राः प्रत्यभिजानाति उच्चैः पठति च। छात्रान् मातृभाषया कथनाय प्रेरयति। पश्चात् अध्यापकः पाठभागे दत्तम् एकैकमपि द्विवारम् उच्चैः स्पष्टतया च वाचयति। छात्रान् अनुवाचनाय प्रेरयति। अध्यापकः पूर्वं सज्जीकृतैः चित्रैः सह कक्ष्यां आगत्य छात्रान् सङ्घान् करोति। पाठभागस्थं कथां क्रमरहितरूपेण एकस्मै सङ्घाय ददाति। कथायाः आशयानुसारं क्रमीकरोतु इति वदति। चित्राणि निरीक्ष्य आशयकथनाय प्रेरयति। आवश्यकं साहाय्यमपि अध्यापकः ददाति।

ततः एकैकः सङ्घाः क्रमीकृतानि चित्राणि प्रदर्शयतु। कथांशान् वदतु च। एकस्य सङ्घस्य अवतारणसमये इतरे सङ्घाः चित्राणां क्रमीकरणसाधुतां विवरणपटुतां च निरीक्षन्तु। ततः सर्वेभ्यो सङ्घेभ्यो अवतारणाय अवसरं ददातु। उचितरीत्या चित्राणि क्रमीकृतान् सङ्घान् अभिनन्दतु।

अनुबन्धप्रवर्तनम् - काकः शरारिः च इति कथायां विद्यमानानां कथापात्राणां (काकः शरारिः, मीनः) चित्राणि विरचय्य उचितं नाम योजयतु ।

आवश्यकानि वस्तुनि - चर्ट्पत्रम् कथाचित्राणि।

**प्रतिकरणानि**